VIKRAMORVAŚÍ:

A DRAMA,

BY KÁLIDÁSA.

EDITED, FOR THE USE OF THE STUDENTS OF THE EAST-INDIA COLLEGE,

BY MONIER WILLIAMS, M.A.

HERTFORD:

PRINTED AND PUBLISHED BY STEPHEN AUSTIN,

BOOKSELLER TO THE EAST-INDIA COLLEGE.

MDCCCXLIX.



Digitized by Google

Digitized by Google

[ADVERTISEMENT.]

THE following edition of the VIKRAMORVAŚÍ has been printed to serve as a Class-Book for the Students of the East-India College. The Sanskrit interpretation has, therefore, been everywhere substituted for the Prákrit. For the same reason, the German method of dividing uncompounded words has been adopted. The Text followed has been generally that of the Calcutta Edition; but some useful emendations have been taken from the otherwise faulty edition of Lenz. To make the present edition more complete, it is proposed hereafter to append the Prákrit passages, and to add a Sanskrit and English Vocabulary.

EAST-INDIA COLLEGE, JUNE, 1849.

Digitized by Google

ERRATUM.

Page 9, line 2 from bottom, for उज्जिकला read उज्झिला.

— 47 — " " ' वलीव्य - °लीक्य

— 50 — 9 - द्विदिकाया - द्विपदि °

— 68 — 9 - मल्लोस। — मल्लोए।

Digitized by Google

॥ विक्रमोर्वशीनाम त्रोटकम् ॥

॥ श्रीकालिदासमहाकविविरचितं ॥

॥ कवि ॥

कु clamare, miserari lamare

कव ou कव̃ precare; laudare; celebrare Comp.

[Comp. moinrés de प्रणाम faire प्रणमिवरे &c.

त्रोटकं । V. Sahitya Darpana, fo. 208, l. 11 :

सप्ताष्ट नव पञ्चाङ्कं दिव्यमानुषसंश्रयं ।
त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकं ॥

संत्रा asile, refuge, (Vedic)

Digitized by Google

Les variantes en rouge sont tirées
d'une édition de Boileau.

Digitized by Google

॥ विक्रमोर्वशी ॥

॥ प्रस्तावना ॥

॥ नान्दी ॥

वेदान्तेषु यम् आहुर् एकपुरुषं, व्याप्य स्थितं रोदसी,
यस्मिन् ईश्वर इत्य् अनन्यविषयः शब्दो यथार्थाक्षरः, ।
अन्तर् यश्च मुमुक्षुभिर् नियमितप्राणादिभिर् मृग्यते, (Sch. दृश्यते)
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसाया 'स्तु वः ॥ १ ॥

॥ नान्द्यन्ते सूत्रधारः ॥

सूत्रधारः । अलम् अतिविस्तरेण ॥ नेपथ्याभिमुखम् अवलोक्य ॥ मारिष, परिषद् एषा पूर्वेषां कवीनान् दृष्टरसप्रबन्धा; अहम् अस्यां कालिदासग्रथितवस्तुना विक्रमोर्वशीनाम्ना नवेन त्रोटकेनो 'पस्थास्ये; तद् उच्यताम् पात्रवर्गः, स्वेषु स्थानेष्व् अवहितैर् भवितव्यम् भवद्भिर् इति । °भावः । Sch.

नटः ॥ प्रविश्य ॥ यथा "ज्ञापयति देवः ।

सूत्रधारः । यावद् अस्याम् आर्यविदग्धमिश्रान् अहमा प्रणिपत्य विज्ञापयामि;

प्रणयिषु दाक्षिण्यवशाद्, अथवा सद्वस्तुबहुमानात्, ।
शृणुत, जना, अवधानात् क्रियाम् इमां कालिदासस्य ॥ २ ॥

॥ नेपथ्ये ॥ आर्याः, परिचारयध्वम्, परिचारयध्वम् ।

सूत्रधारः । अये, किम् अयम् अकस्माद् विमानचारिणाम्

Digitized by Google

आ भवतु । ज्ञातं ।

आकाशे कलकलध्वनिः श्रूयते? ॥ विचिन्त्य ॥ आं, ज्ञातम् भवतु ।

जह्नुवा मरसखस्य मुनेः सुरस्त्री,
कैलासनाथम् उपसृत्य निवर्तमाना, ।
वन्दीकृता विबुधशत्रुभिर् अर्द्धमार्गे;
क्रन्दत्य् अतः शरणम् अप्सरसां गणो ऽयम् ॥ 3 ॥

॥ इति निष्क्रान्तौ ॥

Digitized by Google

॥ अथ प्रथमो ऽङ्कः ॥

॥ ततः प्रविश्यान्य अपटीक्षेपेण 'ऽप्सरसः ॥

अप्सरसः । आर्याः, परिचारयध्वम्, परिचारयध्वं, योऽमरपक्षपाती, यस्य वा 'म्बरतले गतिर् अस्ति ।

॥ ततः प्रविश्यान्य अपटीक्षेपेण रथारूढो राजा सूतश्च ॥

राजा । अलम् आक्रन्दितेन; सूर्योपस्थानसन्निवृत्तम् पुरूरवसम् एत्य कथयतां, कुतो भवत्यः परिचारयितव्या इति ।

रम्भा । असुरावलेपात् ।

राजा । किम् असुरावलेपेन भवतीनाम् अपराद्धम्? ।

रम्भा । शृणोतु महाराजः; या तपोविशेषशङ्कितस्य सुकुमारम् प्रहरणम् महेन्द्रस्य, प्रत्यादेशो रूपगर्वितायाः श्रीगौर्याः, अलङ्कारः स्वर्गस्य, सा नः प्रियसखी, कुबेरभवनान् निवर्तमाना, केना 'पि दानवेन चित्रलेखाद्वितीया 'र्द्धपथ एव निगृहीता ।

राजा । परिज्ञायते, कतमेन दिग्विभागेन गतः स जाल्मः? ।

अप्सरसः । ऐशान्या दिशा ।

राजा । तेन हि मुच्यतां विषादो, यतिष्ये वः सखीप्रत्यानयनाय ।

अप्सरसः ॥ सहर्षम् ॥ सदृशम् इदं सोमवंशसम्भवस्य ।

राजा । क्व पुनर् माम् भवत्यः प्रतिपालयिष्यन्ति? ।

अप्सरसः । एतस्मिन् हेमकूटशिखरे ।

राजा । सूत, ऐशानीं दिशम् प्रति प्रेरया 'श्वान् आयुष्मान् गमनाय ।

सूतः । यथा "ज्ञापयत्य् आयुष्मान् ॥ इति तथा करोति ॥

राजा ॥ रथवेगं रूपयिला ॥ साधु, साधु अनेन रथवेगेन पूर्वप्रस्थितं वैनतेयम् अप्य् आसादयेयम् । मम हि

Digitized by Google

अग्रे यान्ति रथस्य रेणुपदवीं चूर्णीभवन्तो घनाः,
चक्रभ्रान्तिरराऽन्तरेषु वितनोत्यन्यां दृवा 'रावलीम्,।
चिचारम्भविनिश्चलं हयशिरस्यायामवच्चामरं,
यस्मध्ये समवस्थितो ध्वजपटः प्राग्ने च वेगान्निलात् ॥4॥

॥ निष्क्रान्तो राजा सूतश्च ॥

सहजन्या। सखि, गतो राजर्षिस्तस्माद् वयमपि यथासन्दिष्टम् प्रदेशं गच्छामः।

मेनका। सखि, एवं कुर्मः।

॥ इति हेमकूटशिखरे नाट्येना 'धिरोहन्ति ॥

रम्भा। अपि नाम स राजर्षिरुद्धरेन्नो हृदयशल्यम्?।

मेनका। सखि, मा ते संशयो भवतु।

रम्भा। ननु दुर्जया दानवाः।

मेनका। उपस्थितसम्भारो महेन्द्रोऽपि, मध्यमलोकात् सबहुमानम् आनाय्य, तमेव विबुधविजयाय सेनामुखे नियोजयति।

रम्भा। सर्वथा विजयी भवतु।

मेनका॥ क्षणमात्रं स्थित्वा॥ सख्यः, समाश्वसिथ, समाश्वसिथ; एष उल्लसितहरिणकेतनस्तस्य राजर्षेः सोमदत्तो रथो दृश्यते; नैष्फलतार्थः प्रतिनिवर्तिष्यत इति तर्कयामि।

॥ निमित्तं सूचयित्वा 'वलोकयन्त्यः स्थिताः ॥

॥ ततः प्रविशति रथारूढो राजा सूतश्च, भयनिमीलिताक्षी चित्रलेखादक्षिणहस्तावलम्बितो 'र्वशी च ॥

चित्रलेखा। सखि, समाश्वसिहि, समाश्वसिहि।

राजा। सुन्दरि, समाश्वसिहि, समाश्वसिहि।

गतम् भयम्, भीरु, सुरारिसम्भवं;
त्रिलोकरक्षी महिमा हि वज्रिणः;।

तद् एतद् उन्मीलय चक्षुर् आयतं,
निशावसाने नलिनी 'व पङ्कजम् ॥५॥

चित्रलेखा। आश्चर्यम्, उच्छ्वसितमात्रसम्भावितजीविता 'स्या 'पि सङ्ग्रामम् एषा न प्रतिपद्यते।

राजा। बलवद् अत्र ते सखी परिचस्ता। तथा हि

मन्दारकुसुमदाम्ना गुरुर् अस्याः सूच्यते हृदयकम्पः,।
मुहुर् उच्छ्वसिता मध्ये परिणाहवतोः पयोधरयोः ॥६॥

चित्रलेखा॥ सकरुणम्॥ सखि, उर्वशि, पर्युपस्थापया "त्मानम्; अनाथरा इव प्रतिभासि।

राजा।

मुञ्चति न तावद् अस्या भयकम्पः कुसुमकोमलं हृदयम्,।
सिचयान्तेन कथञ्चित् स्तनमध्योच्छ्वासिना कथितः ॥७॥

॥ उर्वशी प्रत्यागच्छति ॥

राजा॥ सहर्षम्॥ चित्रलेखे, दिष्ट्या वर्धसे; प्रकृतिम् आपन्ना ते प्रियसखी। पश्य,

आविर्भूते ऽग्निनि तमसा रिच्यमाने 'व रात्रिर्,
नैशस्या 'र्चिर् हुतभुज इव क्षिप्तभूयिष्ठधूमा,।
मोहेना 'न्तर् वरतनुर् इयं लक्ष्यते मुच्यमाना,
गङ्गा रोधःपतनकलुषा गच्छती 'व प्रसादम् ॥८॥

चित्रलेखा। सखि, उर्वशि, शिवस्ता भव; आपन्नानुकम्पिना महाराजेन पराहताः खलु ते चिदग्रपरिपन्थिनो हताश्च दानवाः।

उर्वशी॥(उन्मील्य चक्षुषी॥) किम्बा सम्प्रहारदर्शिना महेन्द्रेण 'भ्युपपन्ना 'स्मि?।

चित्रलेखा। न महेन्द्रेण; महेन्द्रसदृशानुभावेन राजर्षिणा पुरूरवसा।

* On entrouvant la poésie. Il Sh (ते) ont été variantes par les Danseurs &c. "

Digitized by Google

उर्वशी ॥ राजानम् अवलोक्य "आत्मगतम् ॥ उपहृतं खलु मे दानवेन्द्रसम्भ्रमेण ।

राजा ॥ उर्वशीं विलोक्य "आत्मगतम् ॥ स्थाने, खलु, नारायणम् ऋषिं विलोभयन्त्या ऊरुसम्भवाम् इमां विलोक्य, व्रीडिताः सर्वा अप्सरसः । अथवा नेयं तपस्विनः सृष्टिर् इत्य् अवैमि । कुतः

अस्याः सर्गविधौ प्रजापतिर् अभूच् चन्द्रो नु कान्तिप्रदः,
पुष्पाभरणसम्भारः स्वयं नु मदनो मासो नु पुष्पाकरः; ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन् मनोहरम् इदं रूपम् पुराणो मुनिः? ॥ 9 ॥

उर्वशी । सखि, चित्रलेखे, सखीजनः कुत्र खलु भवेत् ? ।

चित्रलेखा । अभयप्रदायी महाराजो जानाति ।

राजा ॥ उर्वशीं विलोक्य ॥ महति विषादे वर्तते ते सखीजनः, पश्यतु भवती,

यदृच्छया त्वं सहृद् अप्य् अबन्ध्ययोः
पथि स्थिता, सुन्दरि, यस्य नेत्रयोः । ।
त्वया विना सो ऽपि समुत्सुको भवेत् ;
सखीजनस् तें किमु रूढसौहृदः ॥ 10 ॥

उर्वशी ॥ आत्मगतम् ॥ अमृतं खलु ते वचनम्, अथवा चन्द्राद् अमृतम् इति किम् अत्र "सूर्यम् ? ॥ प्रकाशम् ॥ अत एव मे रमते हृदयम्

राजा ॥ हस्तेन दर्शयन् ॥

एताः, सुतनु, मुखं ते सख्यः पश्यन्ति हेमकूटगताः । ।
उत्सुकनयनालोकाश्, चन्द्रम् इवो 'पप्लवान् मुक्तम् ॥ 11 ॥

॥ उर्वशी साभिलाषम् पश्यति ॥

चित्रलेखा । सखि, किम् माम् प्रेक्षसे ? ।

Digitized by Google

ननु समदुःखसुखः पीयते लोचनाभ्याम् ।

उर्वशी । समदुःखसुखः पीयते लोचनाभ्याम् ।

चित्रलेखा ॥ सस्मितम् ॥ अयि, कः ?

उर्वशी । ननु प्रणयिजनः ।

रम्भा ॥ सहर्षम् अवलोक्य ॥ सखि, एष चित्रलेखाद्वितीयाम् प्रियसखीम् उर्वशीं गृहीत्वा, विशाखासहित एव भगवान् सोम, उपस्थितः स राजर्षिः ।

मेनका ॥ निर्वर्ण्य ॥ सखि, द्वे ऽप्य् अत्र प्रिय उपगते, यत् सखी प्रत्यानीता, यच्चा 'परिचतशरीरो राजर्षिर् दृश्यते ।

सहजन्या । सखि, त्वम् भणसि, दुर्जयो दानव इति ।

राजा । सूत, इदं तच् कैलासशिखरम् अवतारय रथम् ।

सूतः । यथा "ज्ञापयत्य् आयुष्मान् ॥ इति तथा करोति ॥

राजा ॥ उर्वशी, रथावतारक्षोभं नाटयन्ती, सचासं राजानम् अवलम्बते ॥

राजा ॥ स्वगतम् ॥ हन्त हन्त, सफलो मे विषयावतारः, /म

यद् इदं रथसङ्क्षोभाद् अङ्गेना 'ङ्गं ममा "यतेक्षणया ।

स्पृष्टं सरोमकण्टकम् अङ्कुरितम् मनसिजेने 'व ॥ 12 ॥

उर्वशी ॥ सव्रीडा ॥ सखि, किञ्चिद् अपरतो ऽपसर ।

चित्रलेखा । ना 'हं ना 'हं शक्ता ।

रम्भा । एवम् प्रियकारिणं सम्भावयामो राजर्षिम् ।

अप्सरसः । एवं कुर्मः ॥ इत्य् उपसर्पन्ति ॥

राजा । सूत, उपक्षेपय रथम्,

यावत् पुनर् इयं सुभ्रूर् उत्सुकाभिः समुत्सुका ।

सखीभिर् याति सम्पर्कं, लताभिः श्रीर् इवा "तवी ॥ 13 ॥

॥ सूतस् तथे 'ति रथं स्थापयति ॥

अप्सरसः । दिष्ट्या, महाराजो विजयेन वर्धते ।

राजा । भवत्यश्च सखीसमागमेन ।

* Il faut द्वे सखि प्रिये ° (v. Mom. Williams' grammar. n°. 38.)

** राजा रथावतारक्षोभं नाटयन्ती । उर्वशी सचासं °

उर्वशी ॥ चित्रलेखादत्तहस्तावलम्बा रथाद् अवतीर्य ॥ सख्यस्, बलितम् परिष्वजध्वम्; न खलु म आसीद् आशंसा यथा पुनर् अपि सखीजनम् प्रेक्षिष्ये ॥ सख्यः परिष्वजन्ते ॥

मेनका ॥ साशंसम् ॥ सर्वथा महाराजः पृथिवीम् पालयन् भवतु।

सूतः। आयुष्मन्, महता रथवंशेनो 'ह्यर्शितम्,

अयञ्च गगणात् को ऽपि तप्तचामीकराङ्गदः।
अभिरोहति शैलाग्रं तडिवान् इव तोयदः ॥ 14 ॥

अप्सरसः। आश्चर्यम्; चित्ररथः।

॥ ततः प्रविशति चित्ररथः ॥

चित्ररथः ॥ राजानम् उपसृत्य ॥ दिष्ट्या, महोपकारपर्याप्तेन विक्रमसहिष्णा वर्धसे।

राजा। अये, गन्धर्वराजः ॥ रथाद् अवतीर्य ॥ स्वागतम् प्रियसुहृदे ॥ अन्योन्यं हस्तं स्पृशतः ॥

चित्ररथः। वयस्य, केशिना 'पहृताम् उर्वशीम् उपश्रुत्य, प्रत्याहरणार्थम् अस्माः शतक्रतुना गन्धर्वसेनाः समादिष्टाः। अनन्तरं विमानचारिभ्यस् त्वदीयं

यशोराशिम् उपश्रुत्य त्वाम् द्रष्टुम् उपागतः;।
भवान् इमां समादाय महेन्द्रं द्रष्टुम् अर्हति ॥ 15 ॥

Bollocton mi fece mirabile

महत् खलु त्वया तत्प्रियम् अनुष्ठितम्; पश्य,

पुरा नारायणेने 'यम् अभिसृष्टा मरुत्वतः,।
दैत्यहस्ताद् अवाक्षिप्य सुहृदा सम्मति त्वया ॥ 16 ॥

राजा। सखे, मै 'वम्

ननु वज्रिण एव वीर्यम् एतद्,
विजयन्ते द्विषतो यद् अस्य पक्षाः'।

Digitized by Google

वसुधाधरकन्दराविसर्पी
प्रतिशब्दो हि हरेर् हिनस्ति नागान् ॥ 16 ॥ (Repetition of 16.)

चित्ररथः। युक्तम्; अनुत्सुकता खलु विक्रमालङ्कारः।

राजा। सखे, नाऽयम् अवसरः शतक्रतुं द्रष्टुम्; अतस् त्वम् एवाऽभवतीम् प्रभोर् अन्तिकम् प्रापय।

चित्ररथः। यथा भवान् मन्यते। इत इतो भवत्यः॥ इति सर्वाः प्रस्थिताः॥

उर्वशी॥ जनान्तिकम्॥ सखि चित्रलेखे, उपकारिणं राजर्षिं न शक्नोम्य् आमन्त्रयितुम्; तत् त्वम् मे मुखम् भव।

चित्रलेखा॥ राजानम् उपसृत्य॥ महाराज, उर्वशी विज्ञापयति, महाराजेना 'भ्यनुज्ञाते 'च्छामि प्रियाम् इव महाराजस्य कीर्तिं सुरलोकं नेतुम्।

राजा। गम्यताम् पुनर्दर्शनाय॥ इति सर्वाः सगन्धर्वा आकाशयानं रूपयन्ति॥

उर्वशी॥ उत्पतनभङ्गं रूपयित्वा॥ आश्चर्यम्; लताविटपेनै 'कावली वैजयन्तिका मे लग्ना॥ सव्याजम् उपसृत्य राजानम् पश्यति॥ सखि चित्रलेखे, मोचय तावद् एनाम्।

चित्रलेखा॥ विलोक्य विहस्य च॥ आं, अयि, दृढं खलु लग्ना, न शक्नोमि मोचयितुम्।

उर्वशी। अलम् परिहासेन; मोचय तावद् एनाम्।

चित्रलेखा। आं, दुर्मोच्ये 'व मे प्रतिभाति; तथा 'पि मोचयिष्यामि तावत्।

उर्वशी॥ स्मितं कृत्वा॥ प्रियसखि, स्मरसि खल्व् एतद् आत्मनो वचनम्।

Digitized by Google

राजा।

प्रियम् आचरितं, लते, त्वया मे,
गमने ऽस्याः क्षणविघ्नम् आचरन्त्या।
यद् इयम् पुनर् अप्य् अरालनेत्रा
परिवृत्ता 'र्द्धमुखी मया 'द्य दृष्टा ॥ 17 ॥

॥ चित्रलेखा मोचयति। उर्वशी, राजानम् अवलोकयन्ती, सनिश्वासं सखीजनम् उत्पतन्तम् पश्यति ॥

सूतः। आयुष्मन्,

अधः सुरेन्द्रस्य कृतापराधान्
प्रक्षिप्य दैत्यान् लवणाम्बुराशौ,।
वायव्यम् अस्त्रं शरधिम् पुनस् ते,
महोरगः स्वभ्रम् इव प्रविष्टम् ॥ 18 ॥

राजा। तेन ह्य् उपस्थेय रथं, यावद् अभिरोहामि।

॥ सूतस् तथा करोति। राजा नाट्येना 'भिरोहति ॥

उर्वशी ॥ सस्पृहं राजानम् अवलोकयन्ती ॥ अपि नाम पुनर् अप्य् उपकारिणम् एतम् प्रेक्षिष्ये ॥ इति सगन्धर्वा सह सखीभिर् निष्क्रान्ता ॥

राजा ॥ उर्वशीवर्त्मोन्मुखः ॥ अहो, दुर्लभाभिलाषी मदनः।

एषा मनो मे प्रसभं शरीरात्,
पितुः पदम् मध्यमम् उत्पतन्ती,।
सुराङ्गना कर्षति, खण्डिताग्रात्
सूत्रम् मृणालाद् इव राजहंसी ॥ 19 ॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति प्रथमो ऽङ्कः।

Digitized by Google

॥ अथ द्वितीयो ऽङ्कः ॥

॥ ततः प्रविशति विदूषकः ॥

विदूषकः ॥ सभ्रमं ॥ भो, निमन्त्रणक, परमाक्रन्देन 'व राजरहस्येन स्फुटमानेन न शक्नोमि जनाकीर्णे आत्मनो जिह्वां धारयितुम् । तद् यावत् स राजा धर्मासनगतो भवेत् तावद् अमुष्मिन् विरलजनसम्मर्दे देवछन्दप्रासादे ऽभिरुह्य स्थास्यामि ।

॥ परिक्रम्य 'पविश्य, पाणिभ्याम् मुखं पिधाय, स्थितः । ततः प्रविशति चेटी ॥

चेटी । आज्ञप्ता 'स्मि देव्या, काश्मिराजदुहित्रा, यथा, सखि निपुणिके, यतः प्रभृति भगवतः सूर्यस्य 'स्तानं कृत्वा प्रतिनिवृत्तो महाराजस्, ततः प्रभृति शून्यहृदय इव लक्ष्यते; तस्मात् त्वम् अप्य् आर्यमाणवकाज् जानीहि तस्य 'त्कण्ठाकारणम् इति । तत् कथं स ब्रह्मबन्धुर् अभ्यर्थितव्यः? । अथवा तृणाग्रलग्नम् इव 'वस्यायसलिलं न तस्मिन् राजरहस्यं चिरं स्थास्यती 'ति तर्कयामि । तद् यावद् एनम् अन्वेष्यामि ॥ परिक्रम्य, दृष्ट्वा ॥ आश्चर्यम्; आलेख्यवानर इव किमपि किमपि मन्त्रयन् निर्भृत आर्यमाणवकस् तिष्ठति । तद् यावद् एनम् उपसर्पामि ॥ उपसृत्य ॥ आर्य, वन्दे ।

विदूषकः । स्वस्ति भवत्याः ॥ स्वागतम् ॥ एतां दुष्टचेटिकाम् प्रेक्ष्य, तद् राजरहस्यं हृदयम् भित्त्वा निष्क्रामती 'व ॥ किञ्चिन् मुखं संवृत्य, प्रकाशम् ॥ भवति निपुणिके, सङ्गीतव्यापारम् उज्झित्वा, कुत्र प्रवृत्ता 'सि ।

* धर्मासनगतस्तावद्भित्वा विरलजन ॰ ** ॰धू स्तसंधातव्यः

Digitized by Google

चेटी। देव्या वचनेना "र्यम् एव प्रेचितुं।

विदूषकः। किं तत्रभवत्य् आज्ञापयति?।

यथा आर्ये° चेटी। देवी भणति यथा "र्यस्य ममो 'पर्य् अदाक्षिण्यम्; न अनुचित° माम् अनुभूतवेदनां दुखिताम् अवलोकयती 'ति।

विदूषकः। निपुणिके, किम्वा प्रियवयस्येन प्रतिकूलं किमपि समाचरितम्?।

चेटी। यन्निमित्तम् पुनर् भर्तो 'त्कण्ठितस्, तस्याः स्त्रिया नाम्ना आक्षेपता भर्चा देव्य् आज्ञप्ता।

विदूषकः। (खगतम्॥) कथं, स्वयम् एव तत्रभवता वयस्येन रहस्यभेदः कृतः; किम् इदानीम् अहम् ब्राह्मणो जिह्वां रचितुं समर्थो ऽस्मि? ॥ प्रकाशम्॥ आं, तत्रभवत्य् उर्वशी 'त्य् अप्सराः। तस्या दर्शनेनो 'न्मादितो, न केवलं ताम् आयासयति, माम् अपि ब्राह्मणम् अग्नितव्यविमुखं दृढम् पीडयति।

उत्पादितो चेटी॥ खगतम्॥ उपपादितो मया भेदो भर्तू रहस्यदुर्गस्यः तस्माद् गत्वा देव्याय् इदं निवेदयामि॥ प्रस्थिता॥

विदूषकः। निपुणिके, विज्ञापय मम वचनेन काशिराजदुहितरम्, परिश्रान्तो ऽस्म्य् अमुष्या मृगतृष्णायाः प्रियवयस्यं निवर्तयितुम्; यदि भवत्या मुखकमलम् प्रेचिष्यते, तदा निवर्तिष्यत इति।

चेटी। यद् आर्य आज्ञापयति॥ इति निष्क्रान्ता॥

॥ नेपथ्ये वैतालिकः पठति॥ जयति जयति देवः।

आलोकान्तप्रतिहततमो वृत्तिर् आसाम् प्रजानां
तुल्योद्योगस् तव च सवितुश् चा 'धिकारो मतो नः;।
तिष्ठत्य् एकः क्षणम् अधिपतिर् ज्योतिषां व्योममध्ये,
षष्ठे काले त्वम् अपि लभसे, देव, विश्रान्तिम् अक्षः॥ १८॥

* Add: किं तत्रभवत्युर्वशी नामधेयेनाभिहिता।
चेटी। का सीवाशी॥ विदूषक। सत्यूर्वशीत्यपरा।

विदूषकः ॥ कर्णं दत्वा ॥ एष पुनः प्रियवयस्यो धर्मासनात् समुत्थित इत एवा "गच्छति; तद् यावत् पार्श्वपरिवर्ती भवामि ॥ इति निष्क्रान्तः प्रवेशकः ॥

॥ ततः प्रविश्य उत्कण्ठितो राजा विदूषकश्च ॥

राजा ।

आदर्शनात् प्रविष्टा सा मे सुरलोकसुन्दरी हृदयम् ।
वाणेन मकरकेतोः कृतमार्गम् अबन्ध्यपातेन ॥ १ ॥

विदूषकः । सपीडा खलु जाता तत्रभवती काशिराजदुहिता ।

राजा ॥ निरीक्ष्य ॥ वक्ष्यते भवता रहस्यविक्षेपः? ।

विदूषकः ॥ आत्मगतम् ॥ वञ्चितोऽस्मि दास्याः दुहित्रा निपुणिकया; अन्यथा कथम् इव सम्पृच्छति वयस्यः ।

राज्ञा । किम् भवान् तूष्णीम् आस्ते? ।

विदूषकः । भो, एवम् मया जिह्वा संयन्त्रिता, येन भवतोऽपि ना 'स्ति प्रतिवचनम् ।

राजा । युक्तम्; अथ केन 'दानीम् आत्मानं विनोदयामि? ।

विदूषकः । भो, महानसं गच्छामः ।

राजा । किं तत्र? ।

विदूषकः । तत्र पञ्चविधस्या 'भ्यवहारस्यो 'त्तमान्नसम्भारस्य भोजनम् मोदकशर्करापिष्टकैर्[1] उत्कण्ठां विनोदयतु ।

राजा । तत्रे "क्षितरससंविधानाद् भवता रंस्यते; मया कथम् असुलभप्रार्थयितव्य आत्मा विनोदयितव्यः? ।

विदूषकः । ननु भणामि, तत्रभवत्या दर्शनपथं गतः ।

राजा । ततः किम्? ।

विदूषकः । न खलु ते दुर्लभे 'ति तर्कयामि ।

राजा । पक्षपातो ऽपि तस्या रूपस्या 'लौकिक एव ।

1) मोदक ... शर्करा ...

Digitized by Google

B. वर्धते विदूषकः। एवं वर्तते कौतूहलम्; किं तावत् तत्रभवत्या उर्वश्या रूपेण? अहम् एव द्वितीयो निरूपितः। B. द्वितीयो विन्यस्यते।

राजा। प्रत्यवयववर्णना तु न क्षता मये 'ति; तेन हि श्रूयतां समासतः।

विदूषकः। भो, अवहितोऽस्मि।

राजा। वयस्य,

आभरणस्या "भरणम्, प्रसाधनविधेः प्रसाधनविशेषः,।
उपमानस्या 'पि, सखे, प्रत्युपमानं वपुस् तस्याः॥ २२॥

विदूषकः। दृढं तावन् मृगतृष्णारसाभिलाषिणा चातकेन 'व दिव्यरसाभिलाषिणा भवता चारुरूपत्वम् परिगृहीतम्।

* abl. राजा। वयस्य, विविधगिरिरोपचारान् ना 'न्यच् छरणम् अस्ति; तद् भवान् प्रमदवनमार्गम् आदेशयतु।

इतं इतीभवान्। विदूषकः। का गतिः। दूतो भवेत्॥ इति परिक्रामति॥

विदूषकः। एष प्रमदवनपरिसरः; अनालक्ष्य प्रत्युपगतो भवेद् आगन्तुना दक्षिणमारुतेन।

राजा। उपपन्नं विशेषणम् अस्य वायोः। अयं हि,

निषिञ्चन् माधवीं लक्ष्मीं, लतां कौन्दीञ्च लासयन्,।
स्नेहदाक्षिण्ययोर् योगात् कामी 'व प्रतिभाति मे॥ २३॥

विदूषकः। ईदृश एवा 'भिनिवेशो भवतु। प्रमदवनम् प्रविशतु भवान्।

राजा। वयस्य, प्रविशा 'वतः॥ उभौ प्रवेशं नाटयतः॥

राजा॥ चारु रूपयित्वा॥ वयस्य, साधु मनसा समर्थित आपत्प्रतीकारः किल ममो 'द्यानप्रवेश इति; तच्चा 'न्यथे 'वो 'पपन्नम्।

विविचोर् यद् इदं नूनम् उद्यानं ना 'द्य शाम्यति,।
स्रोतसे 'वो 'ष्मणस्य प्रतीपतरणम् महत्॥ २४॥

* इदं तावत्। भवता दिव्यरसाभिलाषिणा चातकव्रतं गृहीतं।

Digitized by Google

विदूषकः । कथम् इव? ।

राजा ।

दृढम् असुलभवस्तुप्रार्थनादुर्निवारम्
प्रथमम् अपि मनो मे पञ्चबाणः क्षिणोति; ।
किमुत मलयवातोन्मूलितपाण्डुपत्रैर्
उपवनसहकारैर् दर्शितेष्व् अङ्कुरेषु ॥ २५ ॥

विदूषकः । अलम् भवतः परिदेवितेन; अचिरेणे 'ष्टसम्पाद-
हेतुको ऽनङ्ग एव ते सहायो भविष्यती 'ति ।

राजा । प्रतिगृहीतम् ब्राह्मणवचनम् ॥ इति परिक्रामतः ॥

विदूषकः । प्रेक्षताम् प्रेक्षताम् भवान् वसन्तावतारसूचितस्य
'भिरामत्वम् प्रमदवनस्य ।

राजा । ननु प्रतिपदम् एव तावद् अवलोकयामि । अत्र हि

अग्रे क्षीणखपाटलं कुरुवकं, श्यामं द्वयोर् भागयोर्,
बालाशोकम् उपोढरागसुलभम् भेदोन्मुखं तिष्ठति; ।
ईषद्धूरजःकणायकपिशा चूते नवा मञ्जरी;
मुग्धत्वस्य च यौवनस्य च, सखे, मध्ये मधुश्रीः स्थिता ॥ २६ ॥

विदूषकः । भो, एष कृष्णमणिशिलापट्टसनाथो माधवीलता-
मण्डपो भ्रमरसङ्गपदविघटितैः कुसुमैः कृतोपचार इवा 'भवतो
वर्तते; तद् अनुगृह्यताम् एषः ।

राजा । यद् अभिरोचते भवते ॥ इत्य् उपविशतः ॥

विदूषकः । तद् इदानीम् इहा ''भीनो ललितलताशोभमा-
नलोचन उर्वशीगताम् उत्कण्ठां विनोदयतु भवान् ।

राजा ॥ निश्वस्य ॥

बकुलसुमिताश्व् अपि, सखे, नो 'पवनलतासु रम्यविटपासु ।
चक्षुर् वर्तति धृतिं तद् अङ्गनालोकदुर्ललितम् ॥ २७ ॥

---

* सनाथ

तद् उपायश् चिन्त्यताम् । B. तदुपायश्चिन्त्यतां यथा सफलप्रार्थिनो भवेयं ।

विदूषकः ॥ चिन्तयति ॥ एष चिन्तयामि; मा पुनः परिदेवितैः समाधिम् भंक्ष्यसि ॥ निमित्तं सूचयित्वा, "त्मगतम् ॥ अहो, अहं कार्यदर्शी ।

राजा ।

असुलभा सकलेन्दुमुखी च सा,
किमपि चे 'दम् अनङ्गविचेष्टितम् । ?
अभिमुखीभ्व् दव वाञ्छितसिद्धिषु
व्रजति निर्वृतिम् एकपदे मनः ॥ २४ ॥

॥ इति मदनोत्सुकम् तिष्ठति ॥

॥ ततः प्रविश्यत्य् आकाशयानेनो 'र्वशी चित्रलेखा च ॥

चित्रलेखा । सख्य् उर्वशी, कुत्र खल्व् अनिर्दिष्टकारणं गम्यते? ।

उर्वशी ॥ मदनवेदनाम् अभिनीय, सलज्जम् ॥ सखि, हेमकूटशिखरे लतागृहे लग्नां वैजयन्तिकाम् मोचये 'ति मया भणितो* 'पहस्य माम् भणसि, दृढं खलु लग्ना न शक्या मोचयितुम्; इदानीम् पृच्छसि, कुत्रा 'निर्दिष्टकारणं गम्यते? ।

चित्रलेखा । किन्नु खलु तस्य राजर्षेः पुरूरवसः सकाशम् प्रस्थिता 'सि? ।

उर्वशी । एष सो ऽगणितलज्जो व्यवसायः ।

चित्रलेखा । कः पुनः सख्या प्रथमं तत्र प्रेषितः ।**

उर्वशी । ननु हृदयम् ।

चित्रलेखा । तथापि सम्प्रधार्यतां तावत् ।

उर्वशी । मदनः खलु नियोजयति मां, कुतः सम्प्रधारणा ।

चित्रलेखा । अतो ऽपरं ना 'स्ति म उत्तरम् । B. मे वचनं ।

उर्वशी । तेन "देशयतु मे प्रियसखी मार्गं, येन तत्र गच्छन्त्या

* भणिता indistinct - उपरिस्थ

** illegible

Digitized by Google

* Comp. Çakount., ed. Pischel, p. 200, note to v. 156, l. 8.

Comp. p. 94 l. 2 n. 2

ना 'न्तरायो भवेत् ।

चित्रलेखा । विश्वस्ता भव; ननु भगवता देवगुरुणा 'पराजिता नाम शिखाबन्धनीविद्यो 'पदिष्टा; तेन चिदग्रप्रतिपन्नया 'खंघनीये स्थिते खः ।

* नौ विद्यौ उपदिशता त्रिदशा - B. p. 101.

उर्वशी । सखि, हृदयम् एवं सर्वं जानात्य् एव; मम पुनस् तथा 'प्य् अतिभयेना 'निश्चयः ॥ उभे भ्रमणं रूपयतः ॥

चित्रलेखा । सखि, प्रेक्षस्व, प्रेक्षस्व; एतद् भगवत्या भागीरथ्या यमुनासङ्गमपावनेषु सलिलेषु पुण्येष्व् अवलोकयत इवा ''त्मानम् प्रतिष्ठानस्य शिखाभरणभूतम् इव तस्य राजर्षेर् भवनम् उपगते खः ।

उर्वशी ॥ (सस्पृहम् अवलोक्य) ॥ ननु वक्तव्यं, स्थानान्तरगतः स्वर्ग इति । सखि, कुत्र स आपन्नानुकम्पी भवेत् ? ।

चित्रलेखा । एतस्मिन् नन्दनवनैकप्रदेश इव प्रमदवने ऽवतीर्य स्थास्यावः ॥ उभे ऽवतरतः ॥

चित्रलेखा । सखि, एष प्रथमोदित इव भगवांश् चन्द्रः कौमुदीम् अपेक्षते त्वाम् ।*

उर्वशी । सखि, इदानीम् प्रथमदर्शनाद् अपि सविशेषप्रियदर्शनो मे महाराजः प्रतिभाति ।

चित्रलेखा । युज्यते; तद् एहि, उपसर्पावः ।

उर्वशी । न तावद् उपसर्पिष्यामि; तिरस्करिणीप्रच्छन्ना पार्श्वपरिवर्तिनी भूत्वा श्रोष्यामि तावत्, पार्श्वपरिवर्तिना वयस्येन सह विजने किम् मन्त्रयंस् तिष्ठति ।

चित्रलेखा । यथा ते रोचते ॥ उभे यथोक्रम् अनुतिष्ठतः ॥

विदूषकः । भो, चिन्तितो मया दुर्लभप्रणयिजनस्य समागमोपायः ।

---

* Comp. Kâvyâd. Ed. Gorresio, T. III, p. 372.

Digitized by Google

उर्वशी। का पुनर् धन्या स्त्री, या 'नेन परिष्वज्यमाणा "त्मानं विनोदयति?।

चित्रलेखा। सखि, ध्यानाय किं विलम्ब्यते?।

उर्वशी। सखि, बिभेमि खलु सहसा प्रभावाद् विज्ञातुम्।

विदूषकः। भो, ननु भणामि, चिन्तितो मया दुर्लभजनसमागमोपायः।

राजा। वयस्य, कथ्यताम्।

विदूषकः। स्वप्नकसमागमकारिणीं निद्रां सेवताम् भवान्; अथवा तत्रभवत्या उर्वश्याः प्रतिकृतिं चित्रफलके ऽभिलिख्या "लोकयन्न् आत्मानं विनोदय।

उर्वशी। हृदय, समाश्वसिहि।

राजा। तद् उभयम् अप्य् अनुपपन्नम्; पश्य,

हृदयम् दृष्टिभिः कामिन्या 'न्तः सशल्यम् दृदं; ततः
कथम् उपलभे निद्रां स्वप्ने समागमकारिणीम्;।
न च, सुवर्णाम् आलेख्ये ऽपि प्रियां समवाप्य ताम्,
मम नयनयोर् उद्घाटं, सखे, न भविष्यति ॥ १९ ॥

चित्रलेखा। सखि, श्रुतं त्वया वचनम्?।

उर्वशी। श्रुतं, न पुनः पर्याप्तं हृदयस्य।

विदूषकः। एतावान् मे मतिविभवः।

राजा ॥ निश्वस्य ॥

नितान्तकठिनां रुजम् मम न वेद् या मानसीम्,
प्रभावविदितानुरागम् अवमन्यते चा 'पि सा;।
अबद्धफलनीरसम् प्रतिनिधाय तस्मिन् जने
समागममनोरथम् भवतु पञ्चबाणः क्षती ॥ २० ॥

उर्वशी ॥ सखीम् अवलोक्य ॥ हा धिक्, हा धिक्, माम् अप्य्

एवम् अवगच्छति(महाराजः)। अहम् पुनर् अमर्षा 'स्म्य् अयतो भूत्वा ''त्मानं दर्शयितुम् । तत् प्रभावनिर्मितेन भूर्जपत्रेण लेखं सम्पाद्या 'नरा तस्य क्षेपुम् इच्छामि ।

चित्रलेखा । अनुमतम् मे ॥ उर्वशी, नाट्येना 'भिलिख्य, क्षिपति ॥

विदूषकः । (आश्चर्यम्); भो, किम् एतत् ?। भुजङ्गनिर्मोकः किम् मां खादितुं निपतितः?।

राजा ॥ दृष्ट्वा ॥ ना 'यम् भुजङ्गनिर्मोको, भूर्जपत्रगतो ऽयम् अक्षरविन्यासः ।

विदूषकः । नन्व् अदृष्टयो 'र्वश्या भवतः परिदेवितं श्रुत्वा भूर्जपत्रे (महानुरागसूचकान्य् अक्षराण् अभिलिख्य विसृष्टानि भवेयुः ।

राजा । ना 'स्त्य् अत्रकं दैवस्य ॥ गृहीत्वा 'नुवाच्य, सहर्षम् ॥ सखे, उपपन्नम् ते वितर्कः ।

विदूषकः । यद् अत्रा 'भिलिखितं तच् छ्रोतुम् इच्छामि ।

उर्वशी । साधु, साधु; आर्य, नागरो ऽसि ।

राजा । श्रूयताम् ॥ इति वाचयति ॥ स्वामिन्, सम्भाविता यथा 'हं त्वया 'न्याचीं तथै 'वा 'नुरक्तस्य सुभगै 'वम् एव तव । अनन्तरञ्च (१ रं न) स्खलितपारिजातशयनीयके न मम भवन्ति सुखानि, नन्दनवनवाता- -'पि ग्लपयति एव निजशरीरे ।*

उर्वशी । किन् नु खलु साम्प्रतम् भणति?।

चित्रलेखा । किन् नु भणितम् अनेन स्वानकमलनालसदृशैर् अङ्गैः ।

विदूषकः । दिष्ट्या, मया बुभुक्षितेन स्वस्तिवाचनिकं लब्धम् भवतः समाश्वासनकारणम् ।

राजा । समाश्वासनम् इति किम् उच्यते? पश्य,

*Cruel as you have been, I still cherish you.

**सुभगा एवं

Digitized by Google

तुल्यानुरागपिशुनं ललितार्थबन्धम्,
पत्रे निवेशितम् उदाहरणम् प्रियायाः;।
उत्पक्ष्मलम् मम, सखे, मदिरेक्षणायास्
तस्याः समागतम् इवा "ननम् आननेन ॥ ३१ ॥

उर्वशी। अचा "वयोः समविभागा मतिः।

राजा। वयस्य, अङ्गुलिखेदेन मे क्षुण्णे ऽक्षराणि; धार्यताम् अयं खड्गे निक्षेपः प्रियायाः।

विदूषकः। ततः किम्? इदानीं तत्रभवत्य् उर्वशी भवतो मनोरथकुसुमं दर्शयित्वा फले विसंवदति।

मनोरथकुसुमं

उर्वशी। सखि, यावद् उपस्थानकान्तरम् आत्मानं संस्थापयामि, तावत् त्वम् आत्मानं दर्शयित्वा यन् मे ऽनुमतं तद् भण।

चित्रलेखा ॥ राजानम् उपसृत्य ॥ जयतु जयतु महाराजः।

राजा ॥ सम्भ्रमाद् अगर्वम् ॥ स्वागतम् भवत्यै ॥ पार्श्वम् अवलोक्य ॥ भद्रे,

न तथा नन्दयसि मां, सख्या विरहिता तया,।
सङ्गमे दृष्टपूर्वे 'व यमुना गङ्गया यथा ॥ ३२ ॥

चित्रलेखा। ननु प्रथमम् मेघराजिर् दृश्यते, पश्चाद् विद्युत्।

विदूषकः ॥ अपवार्य ॥ कथं नै 'षो 'वंश् उपगता; तत्रभवत्याः सहचर्यै 'तया भवितव्यम्।

राजा। एतद् आसनम् आस्यताम्।

चित्रलेखा ॥ उपविश्य ॥ उर्वशी महाराजं शिरसा प्रणम्य विज्ञापयति।*

राजा। किम् आज्ञापयति?*

चित्रलेखा। मम तस्मिन् सुरारिसम्भवे दुर्णये महाराज एव शरणम् आसीत्; साम्प्रतं सा 'हं, तव दर्शनसमुत्थेना "यासिना

*Sa maure est rapprochée. विज्ञापयति fait l'avoir.
आज्ञापयति commande.

Digitized by Google

बलवद्
बलितं बाध्यमाना मदनेन, पुनर् अपि महाराजस्य 'नुकम्पनीया भवामि।

राजा। अयि, सखि,

पर्युत्सुकां कथयसि प्रियदर्शनां ताम्;
आर्त्तिं न पश्यसि पुरूरवसस् तदर्थाम्?।
साधारणो ऽयम् उभयोः प्रणयो; यतस्व,
तन्त्रेण तन्त्रम् अयसा घटनाय योग्यम्* ॥ ३३ ॥

चित्रलेखा ॥ उर्वशीम् उपेत्य ॥ सखि, द्रुत एहि; निर्भृततरम् भीषणमदनम् प्रेक्ष्य, प्रियतमस्य ते दूत्य अस्मि संवृत्ता।

उर्वशी ॥ शोकात् सकम्पा ससाध्वसा ॥ अयि, अनवस्थिते, लघ्व् एव त्वया परित्यक्ता 'स्मि।

चित्रलेखा ॥ सस्मितम् ॥ एतस्मिन् मुहूर्ते ज्ञास्यावः का काम् परित्यक्ष्यती 'ति। आकारं तावत् प्रतिपद्यस्व।

उर्वशी ॥ ससाध्वसम् उपसृत्य, सव्रीडम् ॥ जयतु जयतु महाराजः।

राजा ॥ सहर्षम् ॥ सुन्दरि,।

मया नाम जितं यस्य त्वया 'यं समुदीर्यते
जयशब्दः, सहस्राद्याद् आगतः पुरुषान्तरम् ॥ ३४ ॥

॥ हस्ते गृहीत्वा ''सन उपवेशयति ॥

विदूषकः। कीदृशी स्थितिर् भवत्याः? राज्ञः प्रियवयस्यो ब्राह्मणो न वन्द्यते? ॥ उर्वशी सस्मितम् प्रणमति ॥

विदूषकः। स्वस्ति भवत्याः।

॥ नेपथ्ये देवदूतः ॥ चित्रलेखे, त्वरयो 'र्वशीम्।

मुनिना भरतेन यः प्रयोगो
भवतीष्व् अष्टरसाश्रयो निबद्धः,।

* Ed. B... ... समागमयेन्द्रबिम्बं ॥ ३४ ॥

खण्डितामिनवं तम् अद्य मर्ता
मर्तां दृष्टुमनाः सलोकपालः ॥ 35 ॥

॥ सर्व आकर्णयन्ति । उर्वशी विषादं निरूपयति ॥

चित्रलेखा । श्रुतं त्वया देवदूतस्य वचनम् । तस्माद् अनुज्ञापय तावन् महाराजम् ।

उर्वशी ॥ निःश्वस्य ॥ ना 'स्ति मे वाग्विभवः ।

चित्रलेखा । महाराज, उर्वशी विज्ञापयति, परवशो ऽयं जनः; महाराजेना 'भ्यनुज्ञाते 'च्छामि, देवदेवस्या 'नपराद्धुम् आत्मानं कर्तुम् ।

राजा ॥ कथं कथमपि वचनं संस्तभ्य ॥ न हि भवत्योर् ईश्वर-नियोगहन्ता । किन्तु स्मर्तव्यस् त्व् अयं जनः ।

॥ उर्वशी वियोगदुःखं रूपयित्वा, राजानं रूपयन्ती सह सखा निष्क्रान्ता ॥

राजा ॥ सनिःश्वासम् ॥ वैयर्थ्यम् इव चक्षुषः सम्प्रति ।

विदूषकः ॥ पचं दर्शयितुकामः ॥ ननु भूय ॥ इत्य् अर्धोक्तेना "त्मागतं ससम्भ्रमं ॥ भो, उर्वशीदर्शनविक्षिप्तेन तन् मया भूयपचम् प्रभ्रष्टम् अपि हस्तान् न विज्ञातम् ।

राजा । वयस्य, किम् असि वक्तुकामः? ।

विदूषकः । वयस्य, इदम् अस्मि वक्तुकामो, न भवान् अज्ञानि मुच्यतु; दृढं खलु त्वयि बद्धभावो 'र्वशी; न से 'तो गले "तम् अनुबन्धं शिथिलीकरिष्यती 'ति ।

राजा । मया 'प्य् एतद् एव मनसि वर्तते; तथा खलु प्रस्थाने
अगीर्यता शरीरस्य हृदयं सर्वम् मयि ।
स्तनकम्पक्रियाक्षुण्णं न्यस्तं निश्वसितैर् इव ॥ 36

Digitized by Google

विदूषकः ॥ स्वगतम् ॥ वेपते मे हृदयं, कियतीं वेलां तस्य भूर्जपत्रस्य 'त्वभवता वयस्येन नाम गृहीतव्यम् इति ।

राजा । वयस्य, केन 'दानीम् उन्मनसम् आत्मानं विनोद्-यामि? ॥ स्मृत्वा ॥ उपनय भूर्जपत्रम् ।

विदूषकः ॥ (सर्वतो दृष्ट्वा सविषादम्) ॥ हा, कथं न दृश्यते; भो, दिव्यं खलु तद् भूर्जपत्रं गतम् उर्वश्या मार्गेण । (ऊर्ध्वं प्रेक्ष्य गीतम्)

राजा ॥ सासूयम् ॥ सर्वत्र प्रमादी वैधेयः ।

विदूषकः । ननु विचीयताम् ॥ (उत्थाय) ॥ इतो भवेत्, इह वा भवेत् ॥ बहुविधं नृत्यति ॥

॥ ततः प्रविश्य श्रीशीनरी चेटी च, विभवतश्च परीवारः ॥

देवी । सखि निपुणिके, सत्यं लतागृहम् प्रविश्य आर्यमाणव-कसहायो दृष्टस् त्वया महाराजः? ।

चेटी । अलीकं किम् मया भर्त्री विज्ञापितपूर्वा?। *) मया भट्टिनो विज्ञाप्यते ।

देवी । परिक्रम्य पुरस्ताद् अवलोक्यच ॥ निपुणिके, किम् एतत् पत्रं नवचोरम् इवे 'तो दक्षिणमारुतेना "नीयते? । कि दोलत

चेटी ॥ विभाव्य ॥ भर्चि, परिवर्तनाविभावितारम् भूर्जपत्रं खल्व् एतत्; हन्त, कथं देव्या एव नूपुरपरिलग्नम् ॥ गृहीत्वा ॥ ननु वाच्यताम्? । एकी दिलग्नं

देवी । नन्व् अवलोकय तावत्; यद्य् अविरुद्धं तदा श्रोष्यामि ।

चेटी ॥ तथा कृत्वा ॥ भर्चि, तद् एवै "तत् कौलीन्यं विज्ञप्यते; राजानम् उद्दिश्यो 'र्वश्यचरकं काव्यबन्धम् इति तर्कयामि; आर्य-माणवकप्रमादाद् अस्माकं हस्तम् आगतम् इति ।

देवी । ननु गृहीतार्था भव ॥ चेटी वाचयति ॥

देवी । सखि, एतेनै 'वो 'पहारेण तम् अपरः कामुकम् प्रेक्षावहे ।

चेटी । यद् देव्य आज्ञापयति ।

* B. ~~देवी~~ देवी । तेन हि लतावटपार्श्वतो श्रोष्यामि तावद्विश्रब्धसंकथितानि सख्या कार्यं तयं न वेति ॥ चेटी । यद्देव्यै रोचते ॥

Digitized by Google

पवनवशगानि भ्रमदवन-
-समीपगत क्रीडावर्तन-
-चयेषु दृश्यते ।

* राजा । भगवन् वसन्तसखे मलयानिल,

वाताश्रयं हर सम्भृत सुरभितम् पौष्पं रजो वीरुधां;
किं कार्यम् भवतो हतेन दयिताकेशग्रहक्लेशिना मे;।
जानात्य् एव भवान् विनोदनशतैर् एवंविधैर् धारितं
कामार्त्तं जनम्, अञ्जसा 'भिभवितुं ना "लम्बितास्वासनं ॥ ३७

ततो नेपथ्ये कलकलः ।

चटी । देवि, प्रेक्षस्व, प्रेक्षस्वे, 'तस्यै 'व भूर्जपत्रस्था 'श्वेषणा वर्तते ।

देवी । तेन ननु प्रेक्षावहे तावत्; तूष्णीं तिष्ठ ।

विदूषकः । भोः, किं नु खल्व् एतत् ? । उन्मीलन्मानसीलपङ्क-
जच्छविना मयूरपिच्छेन विप्रलब्धोऽस्मि ।

राजा । सर्वथा हतोऽस्मि मन्दभाग्यः ।

देवी ॥ सहसो 'पसृत्य ॥ आर्यपुत्र, अलम् आवेगेन; एतत् तद्
भूर्जपत्रम् ।

राजा ॥ ससम्भ्रमम्, आत्मगतम् ॥ अये, देवी ॥ सवैलक्ष्यम् ॥
स्वागतं देव्यै ।

देवी । दुरागतम् इदानीम् मे संवृत्तम् ।

राजा ॥ जनान्तिकम् ॥ वयस्य, कथम् अत्र प्रतिविधेयम् ? ।

विदूषकः । लोभेन सूचितस्य कुम्भीरकस्य ना 'स्ति वाचा प्रति-
विधानम् ।

राजा । मे 'दम् पत्रम् मया मृग्यते; तत् खलु मन्त्रपत्रं यदर्थम्
मया 'यम् आरम्भोऽन्वेषणाय ।

देवी । युज्यत आत्मनः सौभाग्यं निगूहितुम् ।

विदूषकः । भवतु, वयस्यस्य भोजनं, येन पित्तप्रशमनेन
सुस्थो भवति ।

देवी । निपुणिके, शोभनं खल्व् अनुशासितः प्रियवयस्यो ब्राह्म-
णेन; किम् अन्यद् अन्यद् अभ्यर्थ्या "वेशितो यः खिद्यते ।

Digitized by Google

विदूषकः। ननु प्रेक्षस्व, सर्वं आश्वासिताम् त्वच्चभोजनेन।

राजा। मूर्ख, बलाद् अपराधिनम् माम् आपादयसि।

देवी। ना 'स्ति प्रभवतो ऽपराधः; अहम् एवा 'चा 'परार्द्धा, या प्रतिकूलदर्शना भूत्वा 'यतो भवामि; निपुणिके, इत एहि।

॥ इति सकोपम् प्रस्थिता ॥

राजा।

अपराधी नूनम् अहम्; प्रसीद, रम्भोरु, विरम संरम्भात्;।
सेव्यो जनस्य कुपितः कथं नु दासो निरपराधः ॥39॥

॥ इति पादयोः पतति ॥

देवी। कितव, लघुहृदया खल्व् अहम् अनुनयं न गृह्णामि; किन्तु दक्षिणस्य ते कृतपश्चात्तापस्य बिभेमि।

चेटी। इत इतो देवी।

॥ इति राजानम् अपहाय देवी सपरिजना निष्क्रान्ता ॥

विदूषकः। वर्षनदी 'वा 'प्रसन्ने 'व तत्रभवती गता; तस्माद् उत्तिष्ठो 'त्तिष्ठ।

राजा। वयस्य, ने 'दम् उपपन्नम्; पश्य,

प्रियवचनकृतो ऽपि योषितां
दयितजनानुनयो रसाद् ऋते।
प्रविशति हृदयं न तद्दिदाम्,
मणिर् इव कृत्रिमरागयोजितः ॥40॥

विदूषकः। अनुकूलम् एव भवत एतद् वचनम्; न ह्य् अग्निदुःखितः सम्मुखे दीपशिखां सहते।

राजा। मै 'वम्; उर्वशीगतमनसो ऽपि मम देव्यां स एव बहुमानः; किन्तु प्रणिपातलङ्घनाद् अहम् अपि तस्यां धैर्यम् अवलम्बिष्ये।

Digitized by Google

विदूषकः । भो, तिष्ठतु तावद् देवीकथा; बुभुक्षितस्य मे जीवितम् अवलम्बयतु भवान्; समर्थः खलु स्नानभोजने सेवितुम् ।

राजा ॥ ऊर्ध्वम् अवलोक्य, ॥ कथम् अर्द्धं गतं दिवसस्य; अतः खलु

उष्णांशुः शिशिरे निषीदति तरोर् मूलालवाले शिखी;
निर्भिन्नो 'परिकर्णिकारकुसुमान्य् आशेरते षट्पदाः;।
तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते;
क्रीडावेश्मनिवेशिपञ्जरशुकः क्लान्तो जलं याचते ॥ ११ ॥

॥ इति निष्क्रान्तौ ॥

॥ इति द्वितीयोऽङ्कः ॥

Digitized by Google

॥ अथ तृतीयो ऽङ्कः ॥

॥ ततः प्रविशतो भरतशिष्यौ ॥

प्रथमः । सखे पैलव, अग्निशरणाद् गच्छता महेन्द्रमन्दिरम् उपाध्यायेन त्वम् आसनं याचितः, अहम् अग्निशरणरक्षार्थं स्थापितः; ततः पृच्छामि, गुरोः प्रयोगेण देवपरिषद् आराधिता न वे 'ति?।

द्वितीयः । न जाने, कथं सा "राधिता भवति; तस्मिन् पुनः सरस्वतीकृतकाव्यबन्धे लक्ष्मीस्वयंवर उर्वशी तेषु तेषु रसान्तरेष्व् उन्मादिता "सीत् ।

प्रथमः । दोषविकाश इति वाक्यशेषः ।

द्वितीयः । आं, तस्या वचनं स्खलितम् आसीत् ।

प्रथमः । किम् इव?।

द्वितीयः । लक्ष्मीभूमिकायां वर्तमानो 'र्वशी वारुणीभूमिकायां वर्तमानया मेनकया पृष्टा, समागतास् त्रिलोकपुरुषाः सकेशवा लोकपालाः कस्मिंस् ते हृदयाभिनिवेश इति?।

प्रथमः । ततस् ततः?।

द्वितीयः । तया, पुरुषोत्तम इति वक्तव्ये, पुरूरवसी 'ति निर्गता वाणी।

प्रथमः । भवितव्यानुविधायीनि बुद्धीन्द्रियाणि। न ताम् अभिक्रुद्धो मुनिः?।

द्वितीयः । अग्नेर् 'पाध्यायेन, महेन्द्रेण पुनर् अनुगृहीता।

Digitized by Google

प्रथमः । कथम् इव ? ।

द्वितीयः । येन मम त्वयो 'पदेशो लक्षितस्, तेन न ते दिव्यं ज्ञानम् भविष्यती 'त्य् उपाध्यायस्य सकाशाच् छापः । पुरन्दरेण पुनर् लज्जावनतमुखीम् उर्वशीम् प्रेक्ष्ये 'वम् भणितम्, यस्मिन् बन्धुभावा 'सि त्वं, तस्य मे रणसहायस्य राजर्षेः प्रियं करणीयम्; तस्मात् त्वम् पुरूरवसं यथाकामम् उपतिष्ठस्व, यावत् स प्रतिष्ठितसन्तानो भवती 'ति ।

प्रथमः । सदृशम् पुरुषान्तरवेदिनो महेन्द्रस्य ।

द्वितीयः ॥ सूर्यम् अवलोक्य ॥ कथाप्रसङ्गेना 'पराह्णा 'भिषेकवेला; तस्माद् उपाध्यायस्य पार्श्वपरिवर्तिनो भवावः ॥ इति निष्क्रान्तौ । विष्कम्भकः ॥

॥ ततः प्रविशति कञ्चुकी ॥

कञ्चुकी ।

सर्वः कल्पे वयसि यतते सम्भृम् अर्थान् कुटुम्बी,
पश्चात् पुत्रैर् उपहितभरः कल्पते विश्रमाय; ।
अस्माकं तु प्रतिदिनम् इयं सादयन्ती प्रतिष्ठां **
सेवाकाकुः परिणतिर् अभूत्; स्त्रीषु कष्टो ऽधिकारः ॥ 42 ॥

आदिष्टो ऽस्मि सनियमया काशिराजपुत्र्या, यथा व्रतसमाप्तये मया मानम् उत्सृज्य निपुणिकामुखेन पूर्वं याचितो महाराजः; तद् एवम् मदवचनाद् विज्ञापये 'ति । यावद् अहम् अवसितसन्ध्याकार्यम् महाराजं पश्यामि ॥ परिक्रम्या 'वलोक्य च ॥ रमणीयः किल दिवसावसानवृत्तान्तो राजवेश्मनः । इह हि

उत्कीर्णा इव वासयष्टिषु निशानिद्राक्षसा वर्हिणो,
धूपैर् आलविनिःसृतैर् वलभयः सन्दिग्धपारावताः; ।
आचारप्रयतः सपुष्पबलिषु स्थानेषु सा 'र्चिष्मतीः

* Com. नाशयन्ती ॥ ** विश्रामावस्थानं ॥

सन्ध्यामङ्गलदीपिका विभजते मुग्धाङ्गनावृन्दो जनः ॥ ४३ ॥

॥ अवलोक्य ॥ अये, इत एव प्रस्थितो देवः । य एषः

परिजनवनिताकरार्पिताभिः
परिवृत एष विभाति दीपिकाभिः, ।
गिरिर् इव गतिमान् अपक्षपातात्
अनुतटपुष्पितकर्णिकारयष्टिः ॥ ४४ ॥

यावद् एनम् अवलोकमार्गे प्रतिपालयामि ।

॥ ततः प्रविशति यथानिर्दिष्टः सपरिवारो राजा विदूषकश्च ॥

राजा ॥ आत्मगतम् ॥

कार्यान्तरितोत्कण्ठं दिनं मया गीतम् अनतिक्रूरेण; ।
अविनोददीर्घयामा कथं नु रात्रिर् नमयितव्या ॥ ४५ ॥

कञ्चुकी ॥ उपगम्य ॥ जयति जयति देवः । देव, देवी विज्ञापयति, «मणिहर्म्यपृष्ठे सुदर्शनश् चन्द्रश्; तच सन्निहितेन देवेन प्रतिपालनीयं, यावच् चन्द्ररोहिणीयोगः ।»

राजा । विज्ञाप्यतां देवी, «यस् तव छन्द इति ।»

॥ कञ्चुकी तथे 'ति निष्क्रान्तः ॥

राजा । वयस्य, किमु परमार्थत एव देव्या व्रतनिमित्तो ऽयम् आरम्भः स्यात् ? ।

विदूषकः । तर्कयामि, सञ्जातपश्चात्तापा 'चभवती व्रतव्यपदेशेना 'चभवतः प्रणिपातलङ्घनम् प्रमार्ष्टुकामे 'ति ।

राजा । उपपन्नम् भवान् आह;

अवधूतप्रणिपाताः पश्चात् सन्तप्यमानमनसो हि ।
विविधैर् अनुतप्यन्ते दयितानुनयैर् मनस्विन्यः ॥ ४६ ॥

तद् आदेशय मणिहर्म्यपृष्ठस्य मार्गम् ।

विदूषकः । इत इत एतु भवान्; अमुना गङ्गातरङ्गभिरिवेण

Digitized by Google

स्फटिकमणिशिलासोपानेना "रोहतु भवान्; सर्वदा रमणीयम् मणिहर्म्यतलम्।

॥ राजा "रोहति। सर्वे सोपानारोहणं नाटयन्ति ॥

विदूषकः। निरूप्य। प्रत्यासन्नेन चन्द्रेण भवितव्यं, यथा तिमिरेण रिच्यमानम् पूर्वदिग्मुखम् आलोहितप्रभं दृश्यते।

राजा। सम्यग् भवान् मन्यते।

उदयगूढशशाङ्कमरीचिभिस्
तमसि दूरतरम् प्रतिसारिते,।
अलकसंयमनाद् इव लोचने
हरति मे हरिवाहनदिग्मुखम् ॥47॥

विदूषकः। ही ही, भो भो, एष खण्डमोदकसदृश उदितो राजौ "षधीनाम्।

राजा ॥ सस्मितम् ॥ सर्ववौ "दरिकस्या 'भ्यवहार्यम् एव विषयः ॥ प्राञ्जलिः प्रणिपत्य ॥ भगवन् क्षपराज,

रुचिम् आवहते सतां क्रियायै,
सुधया तर्पयते पितॄन् सुरांश्च,।
तमसां निधिं मूर्छतां निहन्ते,
हरचूडानिहितात्मने नमस् ते ॥48॥

विदूषकः। भो, ब्राह्मणसंक्रामिताचरेण पितामहेना 'भ्यनुज्ञातो ऽसि; आसनगतो भव, तेना 'हम् अपि सुखासीनो भवामि।

राजा ॥ विदूषकवचनम् परिगृह्यो 'पविष्टः, परिजनं विलोक्य ॥ अनभिव्यक्ताश् चन्द्रिकायां दीपिकाः पुनरुक्ताः; तद् विश्राम्यन्तु भवत्यः।

परिजनः। यद् देव आज्ञापयति ॥ इति निष्क्रान्तः ॥

राजा ॥ चन्द्रम् आलोक्य, विदूषकम् प्रति ॥ वयस्य, परम् मुहू-

Digitized by Google

तादृ आगमनं देव्याः; तद् विविक्ते कथयामि खाम् अवखाम्।

विदूषकः। भो, न दृश्यत एवे"षो 'र्वशी; किन्तु तस्याः सदृशम् अनुरागम् प्रेक्ष्य, शक्यं खल्व् आशाबन्धेना "त्मानं धारयितुम्।

राजा। एवम् एतत्; बलवान् मनसो ऽभितापः; पुनः,

नद्या इव प्रवाहो विषमशिलासङ्कटस्खलितवेगः,।

विप्रियसमागमसुखो मनसिशयस् त्व् अनुगुणो भवति ॥ ४७ ॥

विदूषकः। यथा परिहीयमानैर् अङ्गैः शोभसे, तथा 'सरोभिः समागमं ते प्रेक्षे।

राजा ॥ निमित्तं सूचयन् ॥

वचोभिर् आशाजननैर् भवान् इव, गुरुव्यथम्। Supply. देवीसमागमे

अयम् मां स्यन्दितैर् बाष्पैर् आश्वासयति दक्षिणः ॥ ४८ ॥

विदूषकः। ना 'न्यथा ब्राह्मणवचनं भवति।

॥ राजा सप्रत्याशं तिष्ठति। ततः प्रविश्यत् आकाशयानेन कृताभिसरणवेशो 'र्वशी चित्रलेखा च ॥

उर्वशी ॥ आत्मानं विलोक्य ॥ सखि, रोचते मे हृदयम् मुक्ताभरणभूषितो नीलमणिपरिग्रहो ऽभिसारिकावेशः।

चित्रलेखा। ना 'स्ति वाग्विभवः प्रशंसितुम्; इदं तु चिन्तयामि, अपि नामा 'हम् एव पुरूरवा भवेयम् इति।

उर्वशी। सखि, असमर्था खल्व् अहं; त्वम् आनय तं शीघ्रं, नय मां वा तस्य सुभगस्य वसतिम्।

चित्रलेखा। ननु, प्रतिविम्बितम् इव यामिनीयमुनायां कैलासशिखरं सश्रीकं ते प्रियतमस्य भवनम् उपगते खः।

उर्वशी। तेन हि प्रभावेण जानीहि, कुत्र स मम हृदयचौरः किं वा 'नुतिष्ठती 'ति।

चित्रलेखा ॥ आत्मगतम् ॥ भवतु, क्रीडिष्यामि तावद् एतया

Digitized by Google

सह ॥ प्रकाशम् ॥ सखि, दृष्टो मया; उपभोगक्षमे ऽवकाशे मनोरथलब्धं प्रियसमागमसुखम् अनुभवंस् तिष्ठति।

उर्वशी। अपेहि, हृदयं न मे प्रत्येति। सखि चित्रलेखे, हृदये कृत्वा किमपि जल्पसि। प्रियसमागमस्या 'यत एवा 'नेन मे ऽपहृतं हृदयम्।

चित्रलेखा ॥ विलोक्य ॥ एष मणिहर्म्यप्रासादगतो वयस्यमाचसहायो राजर्षिः; तस्माद् उपसर्पावः ॥ उभे ऽवतरतः ॥

राजा। वयस्य, रजन्यां विजृम्भते मदनबाधा।

उर्वशी। अभिलाषार्थेना 'नेन वचनेना "कम्पितं मे हृदयम्; अन्तर्हिते शृणुवो ऽस्या "स्तापं, यावद् आवयोः संगमयच्छेदो भवति।

चित्रलेखा। यत् ते रोचते।

विदूषकः। नन्व् इमे ऽमृतगर्भाः सेव्यन्तां चन्द्रपादाः।

राजा। वयस्य, एवमादिभिर् अनुपक्रम्यो ऽयम् आतङ्कः

कुसुमशयनं न प्रत्यग्रं, न चन्द्रमरीचयो,
न च मलयजं सर्वाङ्गीणं, न वा मणियष्टयः,।
मनसिजरुजं सा वा दिव्या ममा 'स्म अपोहितुं,
रहसि सखयेद् आरब्धा वा तदाश्रयणी कथा ॥ ५१ ॥

उर्वशी। हृदय, यद् इदानीम् असि माम् उज्झित्वे 'तः संक्रान्तं, तस्य फलं लघो 'पलब्धम्।

विदूषकः। [आं, भो,] अहम् अपि यदा गिखरिणीं रसालञ्च न लभे, तदा तद् एव चिन्तयन् आसादयामि सुखम्।

राजा। सम्पद्यते पुनर् भवतः।

विदूषकः। त्वम् अपि ताम् अचिरेण प्राप्स्यसि।

राजा। सखे, एवम् मन्ये।

चित्रलेखा। शृणु, असन्तुष्टे।

* हृद + उज्झित्वे 'तः

विदूषकः । कथम् इव?।

राजा । इदं तया रथचोभाद् अङ्गेना 'ङ्गं निपीडितम् । 52
एकं क्षति शरीरे ऽस्मिन्; शेषम् अङ्गं भुवो भरः ॥

उर्वशी । किम् इदानीम् अपरं विलम्बिष्ये ॥ सहसो 'पगम्य ॥ सखि चित्रलेखे, अग्रतो ऽपि मम स्थिताया उदासीनो महाराजः ।

चित्रलेखा ॥ सस्मितम् ॥ अतिलङ्घिते, असङ्क्लिष्टतिरस्करिण्य् असि ॥ नेपथ्ये ॥ द्रुत द्रुतो भट्टिनी ।

॥ सर्वे कर्णं ददति । उर्वशी सह सखा विषण्णा ॥

विदूषकः । सविस्मयं । भो, उपस्थिता देवी; तन् मुद्रितमुखो भव ।

राजा । भवान् अपि संवृताकारम् आस्ताम् ।

उर्वशी । सखि, अत्र किं करणीयम्?।

चित्रलेखा । अलम् आवेगेन; अन्तरिते 'दानीम् असि त्वम्; विहितनियमव्यापारा च महिषी दृश्यते; तद् एषा न चिरं स्थास्यती 'ति ।

॥ ततः प्रविशति धृतोपहारपरिजना देवी ॥

देवी ॥ चन्द्रम् आलोक्य ॥ सखि, एष रोहिणीयोगेना 'धिकं शोभते भगवान् मृगलाञ्छनः ।

चेटी । ननु सम्पत्स्यते भट्टिनीसहितस्य भर्तुर् विशेषरमणीयता ॥ इति परिक्रामतः ॥

विदूषकः । भो, ननु जानामि, स्खलितवचनिकम् अपि ददाति; अथवा भवन्तम् अन्तरेण चन्द्रव्रतव्यपदेशेन मुक्तरोषा 'द्य मे ऽक्ष्णोः सुभद्रर्शना देवी ।

राजा ॥ सस्मितम् ॥ उभयथा 'पि, भवतो यत् तु पश्चाद् अभिहितं तन् मां प्रतिभाति; यद् अत्रभवती

सितांशुका, मङ्गलमात्रभूषणा,
विचित्रदूर्वाङ्कुरलाञ्छितालका,।
व्रतोपदेशोज्झितगर्ववृत्तिना
मम प्रसन्ना वपुषे 'व लक्ष्यते ॥ 13.

देवी ॥ उपगम्य ॥ जयतु जयतु आर्यपुत्रः ।

परिजनः । जयतु जयतु देवः ।

विदूषकः । स्वस्ति भवत्याः ।

राजा । देवि, स्वागतम् ॥ हस्ते गृहीत्वो 'पवेशयति ॥

उर्वशी । स्थान दृयं हि देवीशब्देनो 'च्चार्यते; न किमपि परिहीयते श्रद्धा ओजस्वितया ।

चित्रलेखा । अस्य अपरं मुखं मन्थितुं ते? ।

देवी । आर्यपुत्रं पुरःकृत्वा को ऽपि व्रतविशेषो मया सम्पादनीयः; तन् मुहूर्तम् उपरोधः सह्यताम् ।

राजा । माणवक, अनुग्रहः खलू 'परोधः ।

विदूषकः । ईदृशो ननु स्वस्तिवाचनं कुर्वतो मम बहुश उपरोधो भवतु ।

राजा । किन्नामधेयम् एतद् देव्या व्रतम् ? ।

॥ देवी निपुणिकाम् अवलोकयति ॥

चेटी । भर्तृप्रियप्रसादनं नाम ।

राजा ॥ देवीं विलोक्य ॥

अनेन, कल्याणि, मृणालकोमलं
व्रतेन गात्रं स्नपयस्य अहर्निशम्, ।
प्रसादम् आकाङ्क्षति यस् तवो 'त्सुकः,
स किं त्वया दासजनः प्रसाद्यते? ॥ 14 ॥

उर्वशी ॥ सवैलक्ष्यस्मितम् ॥ महान् खल्व् अस्मिन् एतस्या बहु-

मानः ।

चित्रलेखा । अयि मुग्धे, अन्यसंक्रान्तप्रेमाणो नागरा अधिकं दक्षिणा भवन्ति ।

देवी । अस्य व्रतस्या 'यं प्रभावो, यद् एतावद् बाधित आर्यपुत्रः ।

विदूषकः । विरमतु भवान् ; न युक्तं बन्धुभाषितं प्रत्याख्यातुम् ।

देवी । दारिकाः, आनयतो 'पहारकं, यावद् धर्म्यगतांश् चन्द्रपादान् अर्चयामि ।

परिजनः । यद् देव्य् आज्ञापयति । एष उपहारः ।

देवी । उपनय ॥ नाव्येन कुसुमादिभिश् चन्द्रपादान् अभ्यर्च्य ॥ सखि, एभिर् उपहारैर् मोदकैर् आर्यमाणवकं कञ्चुकिनश्चा 'र्चयत ।

परिजनः । यद् देव्य् आज्ञापयति । आर्यमाणवक, एतद् उपपादितं स्वस्तिवाचनिकम् ।

विदूषकः ॥ मोदकशरावं गृहीत्वा ॥ स्वस्ति भवत्याः ; बडुफलम् एतद् व्रतं भवतु ।

चेटी । आर्य कञ्चुकिन्, इदं तव ।

कञ्चुकी ॥ गृहीत्वा ॥ स्वस्ति देव्यै ।

देवी । आर्यपुत्र, इतस् तावत् ।

राजा । अयम् अस्मि ।

देवी ॥ राज्ञः पूजाम् अभिनीय, प्राञ्जलिः प्रणम्य ॥ एषा देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्या "र्यपुत्रम् अनुप्रसादयामि ; अद्यप्रभृत्य् आर्यपुत्रो यां स्त्रियं कामयते, या चा "र्यपुत्रसमागमप्रणयिनी, तया सह 'प्रतिबन्धेन वर्तितव्यम् ।

उर्वशी । आर्यस्य न जाने, किं परं तस्या वचनं ; मम पुनर् विश्रम्भविद्रुतं हृदयं संवृत्तम् ।

चित्रलेखा । सखि, महानुभावया पतिव्रतया अभ्यनुज्ञातो, ऽन-

Digitized by Google

°त।
न्तरायस्ते प्रियसमागमो भविष्यती 'ति।

विदूषकः ॥ अपवार्य ॥ किन्नहस्तस्य पुरतो बध्ये पलायिते, भणति। [गच्छ] धर्मो भविष्यती 'ति ॥ प्रकाशम् ॥ भवति, किम् उदासीनस् तत्रभवान्?।

देवी। मूढ, अहं खल्व् आत्मनः सुखावसानेना "र्यपुत्रस्य सुखम् इच्छामि; एतावच् चिन्तय तावत्, प्रियो न वे 'ति।

एतावता

राजा।

दातुम् असहने, प्रभवस् अन्यस्मै, कर्तुम् एव वा दासम्;।
ना 'हम् पुनस् तथा त्वयि, यथा हि मां शङ्कसे, भीरु ॥ ५५॥

भवतु साधु। देवी। भवतु, यथानिर्दिष्टं सम्पादितं प्रियप्रसादनव्रतम्; तद् एत, परिजनाः, गच्छामः।

° संप्रति विहाय गम्यते।

राजा। न खलु प्रसादितम् अपि प्रतिविहाय गम्यते।

देवी। आर्यपुत्र, अलङ्घितपुण्यः सान्त्वतं नियमः ॥ इति सपरिजना निष्क्रान्ता ॥

° तपूर्वः

उर्वशी। सखि, प्रियकलत्रो राजर्षिः; न पुनर् हृदयं निवर्तयितुं शक्नोमि।

चित्रलेखा। कथं स्थिराग्रा निवर्त्यते?।

राजा ॥ आसनम् उपसृत्य ॥ वयस्य, दूरं गता देवी?।

विदूषकः। भण विस्रब्धो यद् अपि वक्तुकामः; अमाध्य इति परिच्छिद्य, "तुर इव वैद्येना, 'चिरेण मुक्तस् तत्रभवत्या भवान्।

° भवताभवत्या भवान्

राजा। अपि नामो 'र्वशी।

उर्वशी ॥ आत्मगतम् ॥ अद्य कृतार्थो भवेत्।

राजा।

गूढं नूपुरशब्दमात्रम् अपि मे कान्तं श्रुतौ पातयेत्;
पश्चाद् एत्य शनैः करोत्पलवृते कुर्वीत वा लोचने;।

Digitized by Google

हर्म्ये ऽस्मिन् अवतीर्य साध्वसवशान् मन्दायमाना, बलाद्
आनीयेत पदात् पदं चतुरया सख्या ममो 'पान्तिकम् ॥ 56 ॥

चित्रलेखा । सख्य उर्वशि, इदं तावत् तव मनोरथं सम्पादय।

उर्वशी ॥ ससाध्वसम् ॥ क्रीडिष्यामि तावत् ।

॥ इति, पृष्टेना "गत्य राज्ञो लोचने संवृणोति ।

चित्रलेखा विदूषकं सञ्ज्ञां लम्भयति ॥

राजा ॥ स्पर्शं रूपयित्वा ॥ सखे, न खलु नारायणोरुसम्भवा वरोरुः?।

विदूषकः । कथम् भवान् अवगच्छति?।

राजा । किम् अत्र ज्ञेयम् [अन्यत्]।

कथम् अन्यथा 'पि पुलकैः कलितं मम गात्रकं करस्पर्शात्;।
नो 'च्छ्वसिति तपनकिरणैश् चञ्चले 'वांशुभिः कुमुदम् ॥ 57 ॥

उर्वशी । आश्चर्यम्, वज्रलेपघटितम् इव मे हृदयं युगलं, न समर्था 'स्य अपनेतुम् ॥ इति मुकुलिताक्षी, चक्षुषोर् हस्तौ अपनीय, ससाध्वसा तिष्ठति। कथञ्चिद् उपसृत्य ॥ जयतु जयतु महाराजः।

चित्रलेखा । सुखं ते वयस्ये।

राजा । नन्व् एतद् उपपन्नम् ।

उर्वशी । सखि, देव्या दत्तो महाराजः; अतस् तस्य प्रणयवती 'वं शरीरसङ्गता 'स्मि; मा खलु मां पुरोभागिनी 'ति समर्थयसि।

विदूषकः । कथम् इदे 'व युवयोर् अस्माद् इतः सूर्यः?।

राजा ॥ उर्वशीम् अवलोक्य ॥

देव्या दत्त इति यदि व्यापारं व्रजसि मे शरीरे ऽस्मिन्,।
प्रथमं कस्या 'नुमते चोरितम् अपि मे त्वया हृदयम्? ॥ 58 ॥

चित्रलेखा । वयस्य, निरुत्तरै 'षा; मम सामग्रतं विज्ञप्तिः श्रूयताम् ।

Digitized by Google

राजा। अवहितो ऽस्मि।

चित्रलेखा। वसन्तानन्तरम् उष्णसमये भगवान् सूर्यो मयो 'पचरितव्यः; तद् यथे 'यम् प्रियसखी स्वर्गस्य नो 'त्कण्ठते, तथा वयस्येन कर्तव्यम्।

विदूषकः। किं वा स्वर्गे स्मर्तव्यम्? न तत्र खाद्यते, न वा पीयते; केवलम् अनिमिषैर् अक्षिभिर् मीनता 'वलम्ब्यते।

राजा। वयस्य,

अनिर्देश्यसुखं स्वर्गं कथं विस्मारयिष्यते;।
अनन्यनारीसामान्यो दासस्या 'यम् पुरूरवाः ॥ 59 ॥

चित्रलेखा। अनुगृहीता 'स्मि; सख्य् उर्वशि, अकातरा भूत्वा विसर्जय माम्।

उर्वशी ॥ चित्रलेखां परिष्वज्य, सकरुणम् ॥ सखि, मा खलु मां विस्मरिष्यसि।

चित्रलेखा ॥ सस्मितम् ॥ वयस्येन सङ्गता त्वम् मये 'वं यातितव्या।

॥ राजानम् प्रणम्य, निष्क्रान्ता ॥

विदूषकः। दिष्ट्या, मनोरथसिद्ध्या वर्धतां भवान्।

राजा। दृमां तावन् मनोरथसिद्धिं पश्य;

सामन्तमौलिमणिरञ्जितपादपीठम्
एकातपत्रम् अवनेर् न तथा प्रभुत्वम्,।
अस्याः, सखे, चरणयोर् अहम् अद्य कान्तम्
आज्ञाकरत्वम् अधिगम्य यथा कृतार्थः ॥ 60 ॥

उर्वशी। ना 'स्ति मे वाग्विभवो ऽतो ऽपरं मन्त्रयितुम्।

राजा ॥ हसेना 'वलम्ब्यो 'र्वशीम् ॥ अहो, अविरुद्धं संवर्धनम् एतद् इदानीम् ईप्सितलक्ष्मणाम्। यतः

Digitized by Google

पादास् त एव शशिनः सुखयन्ति गात्रं,
वाणास् त एव मदनस्य मनो ऽनुकूलाः; ।
संरम्भरूक्षम् इव, सुन्दरि, यद् यद् आसीत्,
तत्सङ्गमेन मम तत् तद् इवा 'नुनीतम् ॥ 61 ॥

उर्वशी । अपराद्धा 'स्मि चिरकारिका महाराजस्य ।

राजा । (सुन्दरि,) मा मै 'वम् ।

यद् एवो 'पनतं दुःखं सुखं तद् वत्सरान्तरम् ; । तद्सवत्तरं ।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ 62 ॥

विदूषकः । भवति, सेविताः प्रदोषरमणीयाश् चन्द्रपादाः; समयस् ते गेहप्रवेशस्य ।

राजा । तेन हि सख्या मार्गम् आदेशय ।

विदूषकः । इत इतो भवती ॥ इति परिक्रामति ॥

राजा । सुन्दरि, इयम् इदानीं मे प्रार्थना ।

उर्वशी । कीदृशी सा ? ।

राजा ।

अनधिगतमनोरथस्य पूर्वं
प्रतिगुणिते 'व गता मम चिरायमा; ।
यदि तु तव समागमे तथै 'व
प्रसरति, सुभ्रु, ततः कृती भवेयम् ॥ 63 ॥

॥ इति निष्क्रान्ताः ॥

॥ इति तृतीयो ऽङ्कः ॥

1/ Cette variante तद्सवत्तरं

॥ अथ चतुर्थो ऽङ्कः ॥

॥ नेपथ्ये सहजन्याचित्रलेखयोः प्रावेशिक्याक्षिप्तिका ॥

प्रियसखीवियोगविमनाः सखीसहिता व्याकुला समुल्लसति
सूर्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे ॥ ७४ ॥

॥ ततः प्रविशति सहजन्या चित्रलेखा च ॥

चित्रलेखा ॥ प्रवेशान्तरे, द्विपदिकया, दिशो ऽवलोक्य ॥

सहचरीदुःखालीढकं
सरोवरे स्निग्धकं,
वाष्पवल्गितनयनकं,
ताम्यति हंसीयुगलकम् ॥ ७५ ॥

सहजन्या ॥ सखेदम् ॥ चित्रलेखे, स्खायमानशतपत्रकृष्णा ते मुखच्छाया हृदयस्था 'स्वस्थतां सूचयति; तत् कथय मे ऽनिर्वृतिकारणं, येन ते समानदुःखा भवामि ।

चित्रलेखा ॥ सकरुणम् ॥ सखि, अप्सरोव्यापारपर्यायेण तत्रभवतः सूर्यस्थो 'पस्थाने वर्तमानया प्रियसख्या विना वसन्तसमय आगत इति बलवद् उत्कण्ठिता 'स्मि ।

सहजन्या । सखि, जानामि युवयोर् अन्योन्यगतं प्रेम । ततस् ततः? ।

चित्रलेखा । तत एषु दिवसेषु को नु हि वृत्तान्तो वर्तत इति प्रणिधानस्थितया मया 'त्याहितम् उपलब्धम् ।

सहजन्या । कीदृशं तत्? ।

चित्रलेखा ॥ सकरुणम् ॥ उर्वशी किल तं राजर्षिं लक्ष्मीसनाथं गृहीत्वा, 'मात्येषु निवेशितराज्यधुरं, कैलासशिखरोद्देशे गन्धमादनवनं विहर्तुं गता।

सहजन्या ॥ सस्पृहम् ॥ सखि, स सम्भोगो, यस् तादृशेषु प्रदेशेषु। ततस् ततः?।

चित्रलेखा। ततस् तत्र मन्दाकिनीतीरे सिकतापर्वतैः क्रीडमानो 'दकवती नाम विद्याधरदारिका तेन राजर्षिणा क्षणं निर्ध्याते, 'ति कृत्वा कुपिता मे प्रियसखी उर्वशी।

सहजन्या। असहमाना खलु सा, दूरारूढो ऽस्याः प्रणयः; तद्भवितव्यता 'च बलवती। ततस् ततः?।

चित्रलेखा। ततः सा भर्तुर् अनुनयम् अप्रतिपद्यमाना, गुरुशापसम्मूढहृदया, विस्मृतदेवतानियमा, कन्यकाजनपरिहरणीयं कुमारवनम् प्रविष्टा। प्रवेशानन्तरञ्च काननोपान्तवर्त्तिलताभावेन परिणतम् अस्या रूपम्।

सहजन्या ॥ सशोकम् ॥ सर्वथा ना 'स्ति विधेर् अलङ्घनीयं नाम, येन तादृशस्य रूपस्या 'न्यादृश एव परिणामः संवृत्तः। ततस् ततः?।

चित्रलेखा। ततः सो ऽपि तस्मिन् एव कानने प्रियसखीम् अन्वेषयन्, उन्मत्तीभूत, इत उर्वशी तत उर्वशी 'ति अहोरात्रम् अतिवाहयति ॥ नभो ऽवलोक्य ॥ एतेन पुनर् निर्वृतानाम् अप्य् उत्कण्ठाकारिणा मेघोदयेना 'प्रतीकारो भविष्यती 'ति तर्कयामि।

॥ अनन्तरे जम्भलिका ॥

सहचरीदुःखालीढकं
सरोवरे स्निग्धकम्
अविरलवाष्पजलोष्णकं
ताम्यति हंसीयुगलकम् ॥ ६८ ॥

Digitized by Google

सहजन्या । सखि, अस्ति को ऽपि समागमोपायः? ।

चित्रलेखा । गौरीचरणरागसम्भवं सङ्गममणिं वर्जयित्वा, कुतो ऽस्याः समागमोपायः? ।

सहजन्या । ने "दृशा आकृतिविशेषाश् चिरं दुःखभागिनो भवन्ति; तद् अवश्यं को ऽपि अनुग्रहनिमित्तभूतः समागमोपायो भविष्यती 'ति तर्कयामि ॥ प्राचीं दिशं विलोक्य ॥ तद् एहि, उदयाधिपस्य भगवतः सूर्यस्यो 'पस्थानं कुर्वः ।

॥ अनन्तरे खण्डधारा ॥

चिन्तादूनमानसिका
सहचरीदर्शनलालसिका ।
विकसितकमलमनोहरे
विहरति हंसी सरोवरे ॥ 67 ॥

॥ इति निष्क्रान्ते । प्रवेशकः ॥

॥ नेपथ्ये पुरूरवसः प्रावेशिक्य् आक्षिप्तिका ॥

गहनं गजेन्द्रनाथः प्रियाविरहोन्मादप्रकटितविकारो
विशति, तरुकुसुमकिसलयभूषितनिजदेहप्राग्भारः ।

॥ ततः प्रविश्य् आकाशबद्धलक्षः सोन्मादो राजा ॥ 68 ॥

राजा ॥ सक्रोधम् ॥ आ, दुरात्मन् रक्षस्, तिष्ठ, तिष्ठ; मम प्रियतमाम् आदाय, क्व गच्छसि? ॥ विलोक्य ॥ कथं, शैलशिखराद् मगणम् उपेत्य, वाणैर् माम् अभिवर्षति ॥ इति लोष्टं गृहीत्वा हन्तुं धावन् । अनन्तरे द्विपदिकया, दिशो ऽवलोक्य ॥

हृदयाहितप्रियादुःखकः,
सरोवरे धुतपक्षको,
वाष्पापवल्गितनयनक्रस्,
ताम्यति हंसयुवकः ॥ 69 ॥

॥ विभाव्य, सकरुणम् ॥ कथम्,

नवजलधरः सन्नद्धो ऽयं, न दृप्तनिशाचरः;
सुरधनुर् इदं दूराकृष्टं, न नाम शरासनम्;।
अयम् अपि पटुर् धारासारो, न बाणपरम्परा;
कनकनिकषस्निग्धा विद्युत्, प्रिया मम नो 'र्वशी ॥

॥ इति मूर्छितः पतति । पुनर्द्विपदिकयो 'त्थाय, निश्वस्य ॥

मया ज्ञातं, मृगलोचनीं निशाचरः को ऽपि हरति,
यावन् नु नवतडितं श्यामलो धाराधरः कर्षति ॥

॥ इति सकरुणं विचिन्त्य ॥ तत् खलु क्व नु गता स्यात्? क्वा 'पि
तिष्ठेत् कोपवशात् प्रभावपिहिता; अथवा दीर्घं न सा कुप्यति;
स्वर्गायो 'त्पतिता भवेन्; मयि पुनर् भावार्द्रम् अस्या मनः; ॥

॥ सरोषम् ॥

तां हर्तुं विबुधद्विषो ऽपि हि न मे शक्ताः पुरोवर्तिनीं,
सा चा 'त्यन्तम् अगोचरं नयनयोर् याते 'ति को ऽयं विधिः ॥

॥ द्विपदिकया दिशो ऽवलोक्य, निश्वस्य, सास्रम् ॥ अहो, अप-
राद्धभागधेयानां दुःखं दुःखानुबद्धम् एव; कुतः?

अयम् एकपदे तया वियोगः
प्रियया चो 'पनतः सुदुःसहो मे,।
नववारिधरोदयाद् अहोभिर्
भवितव्यश्च निरातपत्वरम्यैः ॥

॥ अनन्तरे चर्चरी ॥

जलधर संहरा 'च कोपम्, मया "ज्ञप्तको,
ऽविरलधारासाराक्रान्तदिङ्मुखक;
अये, अहम् पृथ्वीम् भ्रमन् यदि प्रियाम् प्रेक्षिष्ये,
तदा यद् यत् करिष्यसि तत् तत् सहिष्ये ॥

Digitized by Google

॥ चर्चरिकया विचिन्त्य ॥ वृथा खलु मनसः सन्तापवृद्धिर् उपेक्ष्यते। यदा मुनयो ऽप्य् एवं व्याहरन्ति राजा कालकारणम् इति, तत् किम् अहम् एनं जलधरसमयं प्रत्यादिशामि?।

॥ अनन्तरे चर्चरी ॥

गन्धोन्मादितमधुकरगीतैर्,
वाद्यमानैः परभृततूर्यैः,
प्रसारितपवनोद्वेल्लितपल्लवनिकरैः,
सुललितविविधप्रकारैर् नृत्यति कल्पतरुः ॥ १६ ॥

॥ तेन नर्तिता ॥ अथवा न प्रत्यादिशामि, यदि प्रावृषेण्यैर् एव चिह्नैः सम्प्रति महाराजोपचारः क्रियते ॥ विहस्य ॥

* विद्युल्लेखाकनकरुचिरश्रीवितानं ममा 'भं,
व्याधूयन्ते निचुलतरुभिर् मञ्जरीचामराणि,।
घर्मच्छेदात् पटुतरगिरो वन्दिनो नीलकण्ठा,
धारासारोपनयनपरा नैगमाः सानुमन्तः ॥ १७ ॥

॥ पुनश्चर्चरी ॥ भवतु, किम् परिच्छदश्लाघया। यावद् अस्मिन् कानने प्रियाम् प्रणष्टाम् अन्वेषयामि।

॥ पाठस्या 'न्तरे भिन्नकः ॥

दयितारहितो, ऽधिकं दुःखितो,
विरहानुगतः, परिमन्थरको,
गिरिकानने कुसुमोज्ज्वलके,
गजयूथपतिः, पश्य, चीणगतिः ॥ १८ ॥

॥ अनन्तरे द्विपदिकया परिक्रम्या 'वलोक्य च सहर्षम् ॥ हन्त, हन्त, व्यवसितस्य मे संवर्धनं वृत्तम्।

आरक्तकोटिभिर् दूयं कुसुमैर् नवकन्दलो मलिनगर्भैः।
कोपाद् अन्तर्वाष्पे स्मारयति मां लोचने तस्याः ॥ १९ ॥

*B. विद्युल्लेखा कनकरुचिरश्रीर् वितानं ममाभं

Digitized by Google

दूतो गते 'ति कथं मया खलु तत्रभवती सूचयितव्या? यतः

पङ्क्तां स्पृशेद् वसुमतीं यदि सा सुगात्री
मेघाभिवृष्टसिकतासु वनस्थलीषु, ।*
पश्चान्नता गुरुनितम्बतया ततो ऽस्या
दृश्येत चारुपदपंक्तिर् अलक्तकाङ्का ॥ ४० ॥

॥ द्विपदिकया परिक्रम्या 'वलोक्य च ॥ हन्त, हन्त, उपलब्धम् उपलक्षणं, येन तस्याः कोपनायाः सरसम् उन्नीयते मार्गः ।

हृतौष्ठरागैर् नयनोदविन्दुभिर्
निमग्ननाभेर् निपतद्भिर् अङ्गितम् ।
च्युतं रुषा भिन्नगतेर् असंशयं
शुकोदरश्यामम् इदं स्तनांशुकम् ॥ ४१ ॥

भवत्, आदास्ये तावत् ॥ परिक्रम्य विभाव्य च, सास्रम् ॥ कथं, सेन्द्रगोपं शाद्वलम् इदं स्थानं । तत् कुतो ऽस्मिन् विपिने प्रियाप्रवृत्तिम् आगमयेयम् ॥ विलोक्य ॥ अयम्, आसारोच्छलितश्लेलतट-स्थलीपाषाणम् अधिरूढः

आलोकयति पयोदान्, प्रबलपुरोवातनर्तितशिखण्डः, ।
केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन ॥ ४२ ॥

भवतु, यावद् एनम् पृच्छामि ।

॥ अनन्तरे खण्डकः ॥

सम्प्राप्तविस्मरणस्,
त्वरितम् परावरणः,
प्रियतमादर्शनलालसो,
गजवरो विस्मितमानसः ।
॥ तेन खण्डकान्तरं चर्चरी ॥ ४३ ॥

वर्हिणप्रभो, त्वाम् अभ्यर्थये, आचक्ष्व मे तद्,

Digitized by Google

अचा 'रण्ये भ्रमता यदि त्वया दृष्टा सा मम कान्ता?
निशामय, मृगाङ्कसदृशं वदनं, हंसगतिर्,
एतच् चिह्नं ज्ञास्यस्य्, आख्यातं तुभ्यं मया ॥*४३॥

॥ चर्चरिकयो 'पविश्य, 'ञ्जलिम् बद्ध्वा ॥

नीलकण्ठ, ममो 'त्कण्ठा वने ऽस्मिन् वनिता त्वया।
दीर्घापाङ्गा, सितापाङ्ग, दृष्टा दृष्टिश्चमा भवेत् ?॥४४॥

॥ चर्चरिकयो 'पविश्य विलोक्य च॥ कथम्, अदर्शने 'व प्रतिवचनं, नर्तितुम् आरब्धः ॥ पुनश्चर्चरी ॥ तत् किं नु खलु प्रहर्षकारणम् अस्य? आं, ज्ञातम्,

मृदुपवनविभिन्नो यत् प्रियायाः प्रणामाद् (B. विनाशात्)
घनरुचिरकलापो निःसपत्नो ऽस्य जातः;।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे, कं हरेद् एव बर्हः ॥४५॥

भवतु, परव्यसनसुखितं न पुनर् एनम् पृच्छामि ॥ द्विपदिकया दिशो ऽवलोक्य॥ अये, दृश्यम् आतपान्तसन्नुचितमदा जम्बूविटपम् अध्यास्ते परभृता। विहगेषु पण्डितै 'षा जातिः। यावद् एनाम् पृच्छामि।

॥ अनन्तरे खुरकः ॥

विद्याधरकाननलीनको,
दुःखविनिर्गतवाघोत्पीडको,
दूरापसारितहृदयानन्दको,
ऽम्बरमानेन भ्रमति गजेन्द्रकः॥४६॥

॥ खुरकानन्तरे चर्चरी ॥

परभृते मधुरप्रलापिनि, कान्ता
नन्दनवने स्वच्छन्दम् भ्रमन्ती,

*B. °मृगाङ्कसदृशेन वदनेन हंसगतिरनेन चिह्नेन ज्ञास्यसीत्यारभ्य

Digitized by Google

यदि त्वया प्रियतमा सा मम दृष्टा,
B.° आचक्ष्व तम° तद् आचक्ष्व मह्यं, परपुष्टे ॥ 87 ॥

॥ एतद् एव नर्तित्वा, वलन्तिकयो 'पसृत्य, जानुभ्यां स्थित्वा ॥ भवति,

त्वां कामिनो मदनदूतिम् उदाहरन्ति;
मानापमाननिपुणं त्वम् अमोघम् अस्त्रम्;।
ताम् आनय प्रियतमां मम वा समीपम्,
मां वा नया "शु, मृदुभाषिणि, यत्र कान्ता ॥ 88 ॥

॥ वामकेन किञ्चिद् वलित्वा, "काशे ॥ किम् आह भवती? । कथं त्वाम् एवा 'नुरक्तम् अपहाय गते 'ति? ॥ अग्रतो ऽवलोक्य ॥ भवति, एतमनुरक्तम्

नुन
कुपिता; न तु कोपकारणं,
सकृद् अप्य् आत्मगतं स्मराम्य् अहम्;।
प्रभुता रमणेषु योषितां
न हि भावस्खलितान्य् अपेक्षते ॥ 89 ॥

॥ ससम्भ्रमम् उपविश्य, 'नन्तरं जानुभ्यां स्थित्वा, कुपिते 'ति पठित्वा, विलोक्य ॥ कथं, कथाविच्छेदकारिणी स्वकार्ये व्यासक्ता । अथवा सुष्ठु खल्व् इदम् उच्यते,

महद् अपि परदुःखं शीतलं सम्यग् आर्द्रः;
प्रणयम् अगणयित्वा यन् ममा "पन्नतस्य,।
अधरम् इव मदान्धा पातुम् एषा प्रवृत्ता
फलम् अभिनवपाकं राजजम्बूद्रुमस्य ॥ 90 ॥

तद् एवं गते ऽपि प्रिये 'व मे मञ्जुखने 'ति; न कोपो ऽस्याम्; सुखम् आस्तां; भवतीं साधयामस् तावत् ॥ उत्थाय, द्विपदिकया

H

Digitized by Google

परिक्रम्या 'वलोक्य च ॥ अये, दक्षिणेन वनधाराम् प्रियाचरणविन्यासांशुकी नूपुरशब्दः । यावद् एनम् अनुगच्छामि ।

॥ ककुभेन । षड् उपभङ्गाः ॥

प्रियतमाविरहक्लान्तवदनको,
ऽविरलवाष्पजलाकुलनयनको,
दुःसहदुःखविसंष्ठुलगमनकः,
प्रसारितोरुतापदीपिताङ्गको,
ऽधिकं दूनमानसको दरितं गतः,
कानने परिभ्रमति गजेन्द्रकः ॥ 91 ॥

॥ अनन्तरे द्विपदिकया, दिशो ऽवलोक्य ॥

प्रियकरिणीविच्छेदितको,
गुरुशोकानलदीपितको,
वाष्पजलाकुललोचनकः
करिवरो भ्रमति समाकुलकः ॥ 92 ॥

॥ सकरुणम् ॥ हाधिक्, कष्टम्,

मेघश्यामा दिशो दृष्ट्वा मानसोत्सुकचेतसा ।
कूजितं राजहंसेन, ने 'दं नूपुरगिञ्जितम् ॥ 93 ॥

॥ इति पठित्वो, 'त्थाय ॥ भवतु, यावद् एते मानसोत्सुकाः पतत्रिणः सरसो ऽस्मान् नो 'त्पतन्ति, तावद् एतेभ्यः प्रियाप्रवृत्तिम् आगमयेयम् ॥ बलन्तिकयो 'पसृत्य, जानुभ्यां स्थित्वा ॥ हंहो, जलविहङ्गमराज,

पश्चात् सरः प्रतिगमिष्यसि मानसं त्वम्,
पाथेयम् उत्सृज विसं ग्रहणाय भूयः; ।
मां तावद् उद्धर गुरुशो दयिताप्रवृत्त्या;
स्वार्थात् सतां गुरुतरा प्रणयिक्रियै 'व ॥ 94 ॥

॥ क्रियाति ॥

Digitized by Google

॥ तिर्यग् अवलोक्य ॥ अये, यथो 'न्मुखम् आलोकयति, तथा व्यक्तं सोत्सुकमनसा «मया दृष्टे» त्य् आह।

॥ उपविश्य, चर्चरी ॥

अरेरे, हंस, किं गोप्यते?

॥ इति नर्तितो 'त्थाय ॥

यदि, हंस, गता न ते नतभ्रूः
सरसो रोधसि दृक्पथं प्रिया मे,।
मदखेलपदं कथं नु तस्याः
सकलं चौरगतं त्वया गृहीतं।
गत्यनुसारेण मया लक्ष्यते ॥१६॥

॥ चर्चरिकयो 'पसृत्या, 'ञ्जलिं बद्ध्वा ॥

हंस, प्रयच्छ मे कान्तां, गतिर् अस्यास् त्वया हृता,।
विभावितै 'कदेशेन; देयं यद् अभियुज्यते ॥१७॥

॥ पुनश्चर्चरी ॥

कुत्र त्वया ग्रिचितम् एतद् गतिलालसम्? ॥ ॥

॥ पुनश्चर्चरी। सानुनयं «हंस प्रयच्छे» त्यादि पठित्वा, पुनश्चर्चरिकया साक्षेपं «हंस प्रयच्छे» त्यादि पठित्वा, द्विपदिकया निरूप्य ॥ एष स्तेनानुशासी राजे 'त्य् अतिभयाद् उत्पतितः; यावद् अन्यम् अवकाशम् अवगाहिष्ये ॥ द्विपदिकया परिक्रम्या 'वलोक्य च ॥ अये, प्रियासहायश् चक्रवाकस् तिष्ठति; यावद् एनं गच्छामि।*

॥ अनन्तरे कुटिलिका ॥

मर्मररणितमनोहरके

॥ मन्दघटी ॥

कुसुमिततरुवरपल्लविते,

॥ चर्चरी ॥

Digitized by Google

दयितावियोगोन्मादितकः,
कानने भ्रमति गजेन्द्रकः ।
॥ द्विजयान्तरे चर्चरी ॥
गोरोचनाकुङ्कुमवर्ण चक्र, भण मां,
मधुवासरे क्रीडन्ती, धन्या न दृष्टा त्वया? ॥99॥
॥ चर्चरिकयो 'पसृत्य, जानुभ्यां स्थित्वा ॥
* रथाङ्ग नाम, सख्यस्तो रथाङ्गश्रोणिबिम्बया, ।
अयं त्वां पृच्छति रथी मनोरथशतैर् वृतः ॥100॥
अयं कः क? इत्य् आह । न किल विदितो ऽहम् अस्य ।
सूर्यचन्द्रमसौ यस्य मातामहपितामहौ, ।
स्वयंवृतः पतिर् द्वाभ्याम् उर्वश्या च भुवा च यः ॥101॥
कथं, तूष्णीम् एवा "स्से । भवतु 'पालभे तावद् एनम् ॥ जानुभ्यां
स्थित्वा ॥ तद् युक्तं तावद् आत्मानुमानेन वर्तितुं, आकुतः,
सरसि नलिनीपत्रेणा 'पि त्वया "वृतविग्रहां
ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः ।
इति च भवतो जायास्नेहात् पृथक्स्थितिभीरुतां,
मयि च विधुरे भावः को ऽयम् प्रवृत्तिपराङ्मुखः? ॥102॥
॥ उपविश्य ॥ सर्वथा मदीयानां भाग्यविपर्ययाणाम् अयम्
प्रभावः । यावद् अन्यम् अवकाशम् अवगाहिष्ये ॥ द्विपदिकया
परिक्रम्या 'वलोक्य च ॥ अये
इदं रुणद्धि माम् पद्मम्, अन्तःक्वणितषट्पदम् ।
मया दृष्टाधरं तस्याः सशीत्कारम् इवा "ननम् ॥103॥
इतो गतस्या 'नुशयो मा भूद् इत्य् अस्मिन् अपि कमलशये
भ्रमरे प्रणयं करिष्ये ॥ अस्या 'नन्तरे अर्द्धद्विचतुरस्रकः ॥
एकक्रमवर्धितगुरुतरप्रेमरसः,

Digitized by Google

सरसि हंसयुवकः क्रीडति कामवशः ॥104॥

॥ चतुरस्रकेणो 'पविश्य, 'ञ्जलिम् बद्ध्वा ॥

मधुकर, मदिराक्ष्याः शंस तस्याः प्रवृत्तिं;
वरतनुर् अथवा 'सौ नै 'व दृष्टा त्वया मे; ।
यदि सुरभिम् अवाप्स्यस् तन्मुखोच्छ्वासगन्धं,
तव रतिर् अभविष्यत् पुण्डरीके किम् अस्मिन् ॥105॥

॥ इति द्विपदिकया परिक्रम्या 'वलोक्य च ॥ अये, करिणीसहायो नागाधिराजो नीपस्कन्धनिषण्णस् तिष्ठति; यावद् एनं गच्छामि ।

॥ कुटिलिका ॥

करिणीविरहसन्तापितकः

॥ मन्दघटी ॥

काननके गन्धोद्भुतमधुकरकः ॥106॥

॥ अतो ऽन्तरे विलोक्य ॥ अथवा न तावद् अयम् उपसर्पणकालः ।

अयम् अचिरोद्भूतपल्लवम् उपनीतं प्रियतमाग्रहस्तेन ।
अभिलषतु तावद् आसवसुरभिरसं शल्लकीभङ्गम् ॥107॥

॥ स्थानकेना 'वलोक्य ॥ अये, कृताहारकः संवृत्तः; भवतु, समीपम् अस्य गत्वा, पृच्छामि ।

॥ अनन्तरे चर्चरी ॥

अहं त्वाम् पृच्छामि, आचक्ष्व, गजवर,
ललितप्रहारेण नामिततरुवर,
दूरविनिर्जितशशधरकान्तिर्,
दृष्टा प्रिया त्वया सम्मोहयन्ती? ॥108॥

॥ पदद्वयम् पुरत उपसृत्य ॥

मदकलयुवति शशिकला, गजयूथप, यूथिकाशबलकेशी ।

Digitized by Google

स्थिरयौवना स्थिता ते दूरालोके सुखालोका? ॥ 109 ॥

॥ सहर्षम् आकर्ण्य ॥ अहह, अनेन प्रियोपलब्धिशंसिना मन्द्रकण्ठगर्जितेन समाश्वासितो ऽस्मि। साधर्म्याद् भूयसी मे त्वयि प्रीतिः। कथम्? इति।

माम् आहुः पृथिवीभुजाम् अधिपतिं, नागाधिराजो भवान्;
अत्युच्छ्रिन्नपृथुप्रवृत्ति भवतो दानं, समानं मम;।
क्षीरान्नेषु ममो 'वंशो प्रियतमा, यूथे तवे 'यं वशा;
सर्वम् माम् अनु ते, प्रियाविरहजां त्वं तु व्यथाम् मा 'नुभूः ॥ 110 ॥

^य सुखम् आस्ताम् भवान् ॥ द्विदिकया परिक्रम्या' वलोक्य च ॥ अये, अयम् असौ सुरभिकन्धरो नाम विशेषरमणीयः सानुमान्, प्रियस्या 'सारसाम्; अपि नाम सुतनुर् अस्यो 'पत्यकायाम् उपलभ्येत? ॥ परिक्रम्या 'वलोक्य च, ॥ कथम् अन्धकारः। भवतु, विद्युत्प्रकाशेना 'वलोकयामि। कथं, मदीयैर् दुरितपरिणामैर् मेघोदयो ऽपि श्रुतह्रदाभून्यः संवृत्तः। तथा 'पि शिलोच्चयम् एनम् अदृष्ट्वा न निवर्तिष्ये।

॥ अनन्तरे खण्डिका ॥

खरखुरदारितमेदिनीको, (० मेदिनीर् वन?)
वनगहने, ऽविचलः
परिसर्पति, पक्षत, क्षीनो
निजकार्योद्युक्तः कोलः ॥ 111 ॥
अपि वनान्तरम् अल्पभुजान्तरा
अयति पर्वतपर्वसु सन्नता।
इयम् अनङ्गपरिग्रहमङ्गला,
पृथुनितम्ब, नितम्बवती तव? ॥ 112 ॥

कथं, तूष्णीम् एवा "स्ते। शङ्के विप्रकर्षान् न शृणोति। भवतु,

* ० नि + प्र + कृष्

Digitized by Google

समीपम् अस्य गत्वा, पृच्छामि ।

॥ अनन्तरे चर्चरी ॥

स्फटिकशिलातलनिर्मलनिर्झर,
बहुविधकुसुमैर् विरचितशेखर,
किन्नरमधुरोद्गीतमनोहर,
दर्शय मम प्रियतमां, महीधर ॥113॥

॥ चर्चरिकयो 'पसृत्या, 'ञ्जलिम् बद्ध्वा ॥

सर्वचित्तिभृतां नाथ, दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनान्ते ऽस्मिन्, मया विरहिता नु या? ॥114॥

॥ तथे 'व प्रतिशब्दं शृणोति । आकर्ण्य, सहर्षम् ॥ कथं, यथाक्रमं दृष्टे 'त्य् आह । भवत्, अवलोकयामि ॥ दिशो ऽवलोक्य, सखेदम् ॥ कथं, ममै 'वा 'यं कन्दरान्तरविसर्पी प्रतिशब्दः ॥ इति मूर्छति । उत्थायो, 'पविश्य, सविषादम् ॥ अहह, आन्तो ऽस्मि; यावद् अस्या गिरिनद्यास् तीरे तरङ्गवातम् आसेविष्ये ॥ द्विपदिकया परिक्रम्या 'वलोक्य च ॥ इमां नवाम्बुकलुषां स्रोतोवहां पश्यता मया रतिर् उपलभ्यते । कुतः?

तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरसना,
विकर्षन्ती फेनं वसनम् इव संरम्भशिथिलम्,
यथा जिह्मं याति स्खलितम् अभिसन्धाय बहुशो,
नदीभावेने 'यं भ्रुवम् असहमाना परिणता ॥115॥

भवतु, प्रसादयामि तावद् एनाम् ।

प्रसीद, प्रियतमे, सुन्दरिके,
क्षुभितकरुणविहङ्गमके,
सुरसरित्तीरसमुल्लुकके,
अलिकुलझङ्कारितके ॥116॥

॥ तेन कुटिलिकान्तरे चर्चरी ॥

पूर्वदिक्पवनाहतकल्लोलोद्गतबाहुर्,
मेघाङ्गैर् नृत्यति सललितं जलनिधिनाथो,
हंसरथाङ्गश्वङ्कुङ्कुमकृताभरणः,
करिमकराकुलकृष्णकमलकृतावरणो
वेलासलिलोद्वेलितहस्तदत्तालो,
ऽवस्तृणाति दशदिशो रुद्धा नवमेघकालः ॥117॥

॥ चर्चरिकयो 'पसृत्य, जानुभ्यां स्थित्वा ॥

त्वयि निबद्धरती, प्रियवादिनि,
प्रणयभङ्गपराङ्मुखचेतसि, ।
कम् अपराधलवं मयि पश्यसि,
त्यजसि, मानिनि, दासजनं यतः? ॥ 118॥

कथं, तूष्णीम् एवा ''स्ते । अथवा परमार्थतः सरिद् दूयं, नो 'र्वशी; अन्यथा कथं पुरूरवसम् अपहाय समुद्राभिसारिणी भवेत् । अनिर्वेदप्राप्याणि श्रेयांसि; भवतु, तम् एवो 'द्देशं गच्छामि, यत्र मे नयनयोः सा सुनयना तिरोहिता ॥ परिक्रम्या 'वलोक्य च ॥ दूमं तावत् प्रियाप्रवृत्तये सारङ्गम् आसीनम् अभ्यर्थये ।

॥ गलितकः । जानुभ्यां स्थित्वा ॥

अभिनवकुसुमस्तवकिततरुवरस्य परिसरे
मदकलकोकिलकूजितवरझङ्कारमनोहरे ।
नन्दनविपिने निजकरिणीविरहानलेन सन्तप्तो
विचरति गजाधिपतिर् ऐरावतनामा ॥ 119 ॥

॥ विलोक्य ॥

* कृष्णसारच्छविर् योऽयं दृश्यते काननश्रिया ।
नवशष्पावलोकाय कटाक्ष इव पातितः, ॥ 120 ॥

अयम् अन्तिकम् आयान्तीं शिशुना स्तनपायिना ।
अनन्यदृष्टिस् ताम् एव मृगीं द्रष्टुं निरीक्षते ॥121॥

॥ इति चर्चरी ॥

सुरसुन्दरी जघनभरालसा पीनोत्तुङ्गघनस्तनी
स्थिरयौवना तनुशरीरा हंसगतिर्
गगणोज्ज्वलकानने मृगलोचना भ्रमन्ती
दृष्टा त्वया? तद्विरहसमुद्रान्तराद् उत्तारय माम् ॥122॥

॥ उपसृत्या 'ञ्जलिम् बद्ध्वा ॥ हंहो, हरिणपते,
अपि दृष्टवान् असि मम प्रियां वने?
कथयामि ते तदुपलक्षणं, शृणु, ।
पृथुलोचना, सहचरी यथै 'व ते
सुभगा तथै 'व खलु सा 'पि वीक्ष्यते ॥123॥

॥ विलोक्य ॥ कथम्, अनादृत्य मद्वचनं, कलत्राभिमुखं स्थितः । सर्वथो 'पपद्यते परिभवास्पदं विधिविपर्ययः । यावद् अन्यम् अवकाशम् अवगाहिष्ये ॥ परिक्रम्या 'वलोक्य च ॥ हन्त, दृष्टम् उपलक्षणं तस्या मार्गस्य ।

रक्तकदम्बः सो ऽयम् प्रियया घर्मान्तशंसि यस्ये 'दम् ।
कुसुमम् असमग्रकेशरविषमम् अपि कृतं शिखाभरणम् ॥124॥

॥ परिक्रम्या 'वलोक्य च ॥ तत् किं नु खलु शिलाभेदगतं नितान्तरक्तम् इदम् अवलोक्यते? ।

प्रभालेपी ना 'यं हरिहतगजस्या "मिषलवः?
स्फुलिङ्गः स्याद् अग्नेर्; दहनम् अभिवृष्टम् पुनर् इदम्?।
अथे, रक्ताशोकस्तवकसमरागो मणिर् अयं,
यम् उद्धर्तुम् पूषा व्यवसित इवा "लम्बितकरः ॥125॥

भवत्, आदाय तावत् ॥ ग्रहणं नाटयति ॥

Digitized by Google

प्रणयिनीबद्धासादितको,
वाष्पाकुलनिजनयनको,
गजपतिर् गहने दुःखितको
परिभ्रमति क्लान्तवदनकः ॥१२६॥ °भ्रमति क्लान्तमदनः ॥

॥ द्विपदिकयो 'पसृत्य, गृहीत्वा, ''त्मगतम् ॥

मन्दारपुष्पैर् अधिवासितायां
यस्याः शिखायाम् अयम् अर्पणीयः, ।
सै 'व प्रिया सम्प्रति दुर्लभा मे;
मै 'वै 'नम् अश्रूपहतं करोमि ॥१२७॥

॥ इत्य् उत्सृजति ॥

॥ नेपथ्ये ॥ वत्स, गृह्यतां, वत्स, गृह्यताम् ।

सङ्गमनीयो मणिर् दृह शैलसुताचरणरागयोनिर् अयम् ।
आवहति धार्यमाणः सङ्गमम् आशु प्रियाजनेन ॥ १२८ ॥

राजा ॥ ऊर्द्धम् अवलोक्य ॥ को माम् अनुशास्ति? ॥ विलोक्य ॥ कथम्, भगवान् मृगराजधारी। भगवन्, अनुगृहीतोऽहम् अमुनो-'पदेशेन ॥ मणिम् आदाय ॥ हंहो, सङ्गमने ।

तथा विमुक्तस्य निमग्नमध्यया,
भविष्यसि त्वं यदि सङ्गमाय मे, ।
ततः करिष्यामि भवन्तम् आत्मनः
शिखामणिम्, बालम् इवे 'न्दुम् ईश्वरः ॥ ॥

॥ परिक्रम्या 'वलोक्य च ॥ तत् किं खलु कुसुमरहिताम् अपि लताम् इमाम् पश्यता मया रतिर् उपलभ्यते? अथवा स्थाने मम मनो रमते; दृयं हि

तन्वी मेघजलार्द्रपल्लवतया धौताधरे 'वा 'श्रुभिः,
प्रून्ये 'वा "भरणैः, स्वकालविरहाद् विश्रान्तपुष्पोद्गमा, ।

Digitized by Google

चिन्तामीनम् इवा "स्थिता मधुलिहां शब्दैर् विना लक्ष्यते,
चण्डी मां अवधूय पादपतितं याता प्रकुप्ये 'व सा ॥ 130 ॥

यावद् अस्याम् प्रियानुकारिण्यां लतायाम् परिष्वङ्गप्रणयी भवामि।

॥ चर्चरी ॥

लते, प्रेक्षस्व, विच्छिदयो भवामि; ° ... ...
° ... ° यदि विधियोगे पुनस् ताम् प्राप्नोमि,
तदा 'रण्ये ऽपि न करोमि निर्भ्रान्तिम्, ...
पुनर् न हि प्रवेक्ष्यामि तां लतान्ताम् ॥ 131 ॥

॥ इति चर्चरिकयो 'पसृत्य लताम् आलिङ्गति। ततस् तदीयस्थानम् आक्रम्य 'व प्रविष्टो 'वशी ॥

राजा ॥ निमीलिताक्षः, स्वर्गं नाटयित्वा ॥ अये, उर्वशीगाढस्वर्गाद् इव निर्वृतम् मे हृदयं। न पुनर् अस्ति विश्वासः। कुतः

समर्थये यत् प्रथमं प्रियाम् प्रति,
क्षणेन तन् मे परिवर्तते ऽन्यथा;।
अतो विनिद्रे सहसा विलोचने
करोमि न स्वर्गविभावितप्रियः ॥ 132 ॥

॥ शनैर् उन्मील्य चक्षुषी ॥ कथं, सत्यम् एवो 'र्वशी ॥ इति मूर्छितः पतति ॥

उर्वशी। समाश्वसितु, समाश्वसितु महाराजः।

राजा ॥ सञ्ज्ञां लब्ध्वा ॥ प्रिये, अद्य जीवितम्।
लब्धियोगभवे, चण्डि, मया तमसि मज्जता।
दिष्ट्या प्रत्युपलब्धा 'सि, चेतने 'व गतासुना ॥ 133 ॥

उर्वशी। मर्षयतु महाराजो, यन् मया कोपवशं गतया 'वस्थान्तरम् प्रापितो महाराजः।

Digitized by Google

राजा । ना 'हम् प्रसादयितव्यस् त्वया; त्वद्दर्शनेन प्रसन्नो मे सर्वाङ्गान्तरात्मा । कथय, कथम् दूयन्तं कालम् मया विरहिता स्थिता 'सि ।

मयूरपरभृतहंसरथाङ्गम्,
अलिगजपर्वतसरित्कुरङ्गम्,
तव कारणाद् अरण्ये भ्रमता,
को न खलु पृष्टो मया रुदता ॥ 13 ॥

उर्वशी । एवम् अन्तःकरणप्रत्यक्षीकृतवृत्तान्तो महाराजः ।

राजा । प्रिये, अन्तःकरणम् इति न खल्व् अवगच्छामि ।

उर्वशी । शृणोतु महाराजः । पुरा भगवता महासेनेन शाश्वतं कुमारव्रतं गृहीत्वा 'यं सकलकलुषो नाम गन्धमादनकक्षो ऽध्यासितः, कृता च स्थितिः ।

राजा । कीदृशी? ।

उर्वशी । या किल स्त्री 'मम् प्रदेशम् आगमिष्यति, सा लताभावे परिणतरूपा भविष्यति, गौरीचरणरागसम्भवं मणिं वर्जयित्वा च लताभावं न मोक्ष्यिती 'ति । ततो ऽहं गुरुशापसम्मूढहृदया, विस्मृतदेवतानियमा, कन्यकाजनपरिहरणीयं कुमारवनम् प्रविष्टा; प्रवेशानन्तरञ्च काननोपान्तवर्तिना लताभावेन परिणतम् मे रूपम् ।

राजा । प्रिये, सर्वम् उपपन्नम् ।

रतिखेदसुप्तम् अपि मां शयने या मन्यसे प्रवासगतम्,।
सा त्वम् दृष्टे 'तदवस्थं कथं सहेथाश् चिरवियोगम् ॥ 14 ॥

दर्शये 'तद् यथाकथितं सङ्गमनिमित्तं पुनरुपलब्धिप्रभावम् अस्माभिर्

॥ इति मणिं दर्शयति ॥

Digitized by Google

उर्वशी। कथम्, आश्चर्यं, सङ्गमनीयो ऽयम् मणिः; अत एव महाराजेना "लिङ्गिते 'व प्रकृतिस्था 'स्मि संवृत्ता।

राजा ॥ ललाटे मणिं सन्निवेश्य ॥

स्फुरता विच्छुरितम् इदं रागेण मणेर् ललाटनिहितस्य।
श्रियम् उद्वहति मुखं ते बालातपरक्तकमलस्य ॥ 136 ॥

उर्वशी। प्रियंवद, महान् खलु काल आवयोः प्रतिष्ठानतो निर्गतयोः; कदाचिद् असूयिष्यन्ति प्रकृतयः; एहि, गच्छावः।

राजा। यद् आह भवती ॥ इत्य् उत्तिष्ठतः ॥

उर्वशी। अथ कथम् पुनर् महाराजो गन्तुम् इच्छति?।

राजा।

अचिरप्रभाविलसितैः पताकिना,
सुरकार्मुकाभिनवचित्रशोभिना,।
गमितेन खेलगमने विमानतां
नय मां नवेन वसतिम् पयोमुचा ॥ 137 ॥

प्राप्तसहचरीसङ्गमकः,
पुलकप्रसाधिताङ्गकः;।
स्वेच्छाप्राप्तविमानको,
विहरति हंसयुवकः ॥ 138 ॥

॥ इति खण्डधारया निष्क्रान्तौ ॥

॥ इति चतुर्थो ऽङ्कः ॥

* Comp. Sk. 120, v. 4.

* Vaijayantîtha ayaṃ rājarṣe gamitêna dhavalaṃ vimānatâṃ ena nakṣatra dêchar patâkinâ ayant pourvu d'étendard (mum d'étendard) atchiva prabhâvilasitay par l'éclat, l'éclair, Khêlagamanâ (Nyaupba) à la démarche gracieuse ô maya mâm conduis moi.

॥ अथ पञ्चमो ऽङ्कः ॥

॥ ततः प्रविशति दृष्टो विदूषकः ॥

विदूषकः। ही ही, भो भो, दिष्ट्या, चिरस्य कालस्यो 'र्वशीसहायस् तत्भवान् राजा नन्दनवनप्रमुखेषु प्रदेशेषु विहृत्य प्रतिनिवृत्तो नगरम्, इदानीं स्वकार्यानुशासने प्रकृतिमण्डलम् अनुरञ्जयन् राज्यं करोति। अां, सन्तानं वर्जयित्वा न तस्य किमपि शोचनीयम्। अद्य तिथिविशेष इति भगवत्योर् गङ्गायमुनयोः सलिलेषु देव्या सह कृताभिषेकः, साम्प्रतम् उपकारिकाम् प्रविष्टः; तद् यावद् अलंक्रियमाणस्या 'ङ्गानुलेपनवल्लभाभिर् अन्तरं भवामि।

॥ नेपथ्ये ॥ हाधिक्, हाधिक्, एष ज्वलन[रक्त]नालवृन्तपिधानं निक्षिप्य नीयमानो ऽस्मरोविरहितेन मौलिरत्नतायाम् प्रयोजितो मणिर् आमिषशङ्किना गृध्रेण भक्षितः।

विदूषकः॥ आकर्ण्य॥ अत्याहितम्; परमबऊमतः खलु स वयस्यस्य सङ्गमनीयो नाम चूडामणिः। अतः खल्व् असमाप्तनेपथ्य एव तत्भवान् आसनाद् एवो 'त्थितः; तस्मात् पार्श्वपरिवर्ती भवामि।

॥ इति निष्क्रान्तः। प्रवेशकः॥

॥ ततः प्रविशति राजा किदूषकश्च, कञ्चुकिरेचकौ परिजनश्च॥

राजा। रेचक, रेचक,

आत्मनो वधम् आहर्ता का 'सौ विहगतस्करः,।
येन तत् प्रथमं क्षेयं गोपुर् एव गृहे कृतम्? ॥ ३० ॥

Digitized by Google

किरातः । एषो, ऽग्रमुखकोटिलग्नसूचेण मणिना 'नुरञ्जयन्न् इवा "काशम् परिभ्रमति ।

राजा । पश्याम्य् एनम् ।

अयं मुखालम्बितहेमसूचम्
बिभ्रन् मणिं मण्डितशीघ्रचारः, ।
अलातचक्रप्रतिमं विहङ्गस्
तद्रागलेखावलयं तनोति ॥ १५ ॥

कथय, किं खल्व् अत्र कर्तव्यम् ।

विदूषकः । अलम् अत्र घृणया; एषो ऽपराधी शासनीयः ।

राजा । सम्यग् आह भवान्; धनुर्, धनुस् तावत् ।

परिजनः । यद् भर्ता "ज्ञापयति ॥ इति निष्क्रान्तः ॥

राजा । न दृश्यते हि विहगाधमः ।

विदूषकः । इत इतो, दक्षिणान्तरेण चलितः स पुनर् हताशः ।

राजा ॥ दृष्ट्वा ॥ इदानीम्

प्रभापल्लवितेना 'सौ करोति मणिना खगः ।
अग्रोत्कीर्णलवकेने 'व दिक्षु खस्रा 'वतंसकम् ॥ १६ ॥

यवनी ॥ धनुर्हस्ता प्रविश्य ॥ भर्तर्, एतत् सशरं चापम् ।

राजा । किम् इदानीं धनुषा; वाणपथातीतः क्रव्यभोजनः ।

तथा हि

आभाति मणिविशेषो दूरम् इदानीं पतत्रिणा नीतः, ।
नक्तम् इव लोहिताङ्कः परुषघनच्छेदसम्पृक्तः ॥ १७ ॥

आर्य तालव्य ।

कञ्चुकी । यथा "ज्ञापयति देव. ।

राजा । मद्वचनाद् उच्यन्तां नागरिकाः सायन्निवासवृक्षाग्रे विचीयतां विहगाधमः ।

Digitized by Google

कञ्चुकी। यथा "ज्ञापयति देवः ॥ इति निष्क्रान्तः ॥

विदूषकः। भो, विश्राम्यतु भवान् साम्प्रतम्; कुत्रा 'पि गतो मणिकुम्भीरको भवतः शासनान् न मोक्ष्यति ॥ इत्य् उपविशतः ॥

राजा। वयस्य,

सार इव न मे तस्मिन् मणौ प्रयासो विरङ्गमाचिन्ने।
प्रियया तेना 'स्मि, सखे, सङ्गमनीयेन सङ्गमितः ॥ 143 ॥

कञ्चुकी ॥ प्रविश्य ॥ जयति जयति देवः।

अनेन निर्भिन्नतनुः स बध्नो
रोषेण ते मार्गणतां गतेन,।
प्राप्तापराधः सहसा 'न्तरीक्षात्
समौलिरत्नः पतितः पतत्री ॥
॥ सर्वे विस्मयं रूपयन्ति ॥ 144 ॥

कञ्चुकी। अभिप्रक्षालितो ऽयम् मणिः कस्मै प्रदीयताम्?।

राजा। गच्छ, कोषपेटके स्थापये 'नम्।

किरातः। यद् भर्ता "ज्ञापयति ॥ इति मणिम् आदाय निष्क्रान्तः ॥

राजा ॥ तालव्यम् प्रति ॥ सखे, जानाति भवान् कस्या 'यं बाण इति?।

कञ्चुकी। नामाङ्कितो दृश्यते; ना 'च मे वर्णविभावनसहा दृष्टिः।

राजा। तद् उपश्लेषय शरं, यावन् निरूपयामि।

विदूषकः। किम् भवान् विचारयति?।

राजा। शृणु तावत् प्रहर्तुर् नामाक्षराणि।

विदूषकः। अवहितो ऽस्मि।

राजा ॥ वाचयति ॥

उर्वशीसम्भवस्या 'यम् ऐलसूनोर् धनुश्मतः।

Digitized by Google

कुमारस्या "युषो वाणः संहर्ता दिषदायुषाम् ॥ 145 ॥

विदूषकः। दिष्ट्या, सन्तानेन वर्धते भवान्।

राजा। कथम् एतत्, सखे? अन्यच्च नैमेषेयसवाद् अभियुक्तो ऽहम् उर्वश्या; न कदाचिद् अपि तत्रभवती गर्भाभिभूतदोहदा 'प्य् उपलक्षिता; कुत एव प्रसूतिः? किन्तु

आनीलचूचुकाग्रं, लवलीफलपाण्डुराननच्छायम्,।
कतिचिद् अहानि शरीरं स्थवलयम् इवा 'भवत् तस्याः ॥ 146 ॥

विदूषकः। मा भवान् मानुषीधर्मम् उर्वश्याः सम्भावयतु; प्रभावगूढानि देवचरितानि।

राजा। अस्तु तावद् एवं, यथा "ह भवान्; अत्र संवरणे किम् इव कारणं तस्याः?।

विदूषकः। मा वृद्धाम् मां राजा परिहरिष्यती 'ति।

राजा। कृतम् परिहासेन; चिन्त्यताम्।

विदूषकः। को दैवरहस्यानि चिन्तयिष्यति।

कञ्चुकी ॥ प्रविश्य ॥ जयति जयति देवः। एषा खलु च्यवनाश्रमाद् भार्गवी कुमारम् आदाया "याता तापसी देवं द्रष्टुम् इच्छति।

राजा। उभयम् अप्य् अविलम्बम् प्रवेशय।

॥ कञ्चुकी तथे 'ति निर्गम्य तापसीसहितं कुमारम् आदाय प्रविष्टः॥

विदूषकः। ननु खल्व् एष चक्रवर्तिलक्षणोपेतो यस्य नामाङ्कितो गृध्रलक्ष्यवेधी नाराचः; तथा हि बहुधा भवतो ऽनुकरोति

राजा। एवम् एतत्।

वात्सल्यवन्ति हृदयम्, मनसः प्रसादः;।
सञ्जातवेपथुभिर् उज्झितधैर्यवृत्तम्
इच्छामि दीर्घम् अयम् परिरम्भम् अङ्गैः ॥ 147 ॥

Digitized by Google

॥ उपसृत्य ॥ भगवति, अभिवादये।

तापसी। महाराज, सोमवंशं धारयन् भव॥ आत्मगतम्॥ भो, अनेना 'कथितो ऽपि विज्ञात एवा 'स्य राजर्षेर् आत्मन औरसः सम्बन्धः॥ प्रकाशम्॥ वत्स, प्रणम गुरूम्।

॥ कुमारो वाष्पगर्भम् अञ्जलिम् बद्ध्वा प्रणमति॥

राजा। वत्स, आयुष्मान् भूयाः।

कुमारः॥ स्पर्शं रूपयित्वा, स्वगतम्॥

यदि हार्दम् इदं श्रुत्वा «पिता ममा 'यं सुतो ऽहम् अस्ये»ति,।
उत्सङ्गे वृद्धानां गुरुषु भवेत् कीदृशः स्नेहः॥ 148॥

राजा। भगवति, किम् आगमनप्रयोजनम्?।

तापसी। शृणोतु महाराजः; एष दीर्घायुर् उर्वश्या जातमात्र एव किमपि निमित्तम् प्रेक्ष्य मम हस्ते न्यासीकृतः; यथा त्वचियस्य कुलीनस्य जातकर्मादिविधानं तद् अस्य तत्रभवता च्यवनेन सर्वम् अनुष्ठितम्; इदानीं गृहीतविद्यो धनुर्वेदे विनीतः।

राजा। समाधः खलु संवृत्तः।

तापसी। अद्य पुष्पफलसमित्कुशनिमित्तम् ऋषिकुमारकैः सह गतेना 'मुना "श्रमविरुद्धम् आचरितम्।

विदूषकः। कथम् इव?।

तापसी। गृहीतामिषः किल गृध्र आश्रमपादपाग्रशिखरे निलीयमानो रक्तीकृतो वाणस्य।

राजा। ततस् ततः?।

तापसी। तत उपलब्धवृत्तान्तेन भगवता 'हं समादिष्टा, निषादयो 'र्वशीहस्ते न्यासम् इति; तद् इच्छाम्य् उर्वशीम् प्रेक्षितुम्।

राजा। आसनम् अनुगृह्णातु भवती॥ प्रेष्योपनीतयोर् आसनयोर् उपविष्टौ॥ आर्य तालव्य, उर्वशीम् उच्यताम्।

Digitized by Google

॥ कञ्चुकी तथे 'ति निष्क्रान्तः ॥

राजा । एह्य् एहि, वत्स,

सर्वाङ्गीनः स्पर्शः सुतस्य किल; तेन माम् उपनतेन ।
प्रह्लादयस्व तावच्, चन्द्रकरैश् चन्द्रकान्तम् इव ॥ 149 ॥

तापसी । वत्स, नन्दय पितरम् ॥ कुमारो राजानम् उपसर्पति ॥

राजा ॥ आलिङ्ग्य ॥ वत्स, प्रियसखम् ब्राह्मणं वन्दस्व ।

विदूषकः । किम् इति मां शङ्कते? आश्रमम् परितः परिक्षिप्ता एतस्य शाखामृगाः ।

कुमारः ॥ सस्मितम् ॥ तात, वन्दे ।

विदूषकः । स्वस्ति भवतु ते, वर्धताम् भवान् ।

॥ ततः प्रविश्यत् उर्वशी कञ्चुकी च ॥

कञ्चुकी । इत इतो भवती ।

उर्वशी ॥ प्रविश्य 'वलोक्य च ॥ को नु खल्व् एष, कनकपीठोपविष्टो महाराजेन संयम्यमानग्रिखण्डकस् तिष्ठति? ॥ तापसीं दृष्ट्वा ॥ आश्चर्यम्; सत्यवतीसहितः पुत्रको म आयुः; महान् खलु संवृत्तः ।

राजा ॥ विलोक्य ॥ वत्स,

इयं ते जननी प्राप्ता त्वदालोकनतत्परा,
स्नेहप्रस्रवनिर्भिन्नम् उद्वहन्ती स्तनाग्रयुगम् ॥ 150 ॥

तापसी । वत्स, एहि, प्रत्युपगच्छ मातरम् ॥ इति कुमारेण सहो 'र्वशीम् उपसर्पति ॥

उर्वशी । आर्ये, पादवन्दनं करोमि ।

तापसी । वत्से, भर्तुर् बहुमता भव ।

कुमारः । आर्ये, अभिवादये ।

उर्वशी । वत्स, पितरम् आराधयन् भव ॥ राजानम् प्रति ॥ जयतु जयतु महाराजः ।

Digitized by Google

राजा। स्वागतम् पुत्रवत्यै। इत आस्यताम्।

उर्वशी। आर्या, उपविशत॥ सर्वे तथे 'त्युपविष्टाः॥

तापसी। वत्से, गृहीतविद्यः साम्प्रतम् आयुधकवचधरः संवृत्त एष भर्तुस् ते समक्षं निष्पादितो मया तव हस्ते निक्षेपः; तद् विसर्जितुम् आत्मानम् इच्छामि; उपरुध्यते म आश्रमवासधर्मः।

उर्वशी। काममम्; चिरस्य प्रेच्य विरहोत्कण्ठिता 'स्मि, न पुनर् धर्मावरोधे वर्तितुं, गच्छत्व् आर्या, पुनर् अपि दर्शनाय।

राजा। आर्ये, तत्रभवते च्यवनाय मम प्रणामम् आवेदयिष्यसि।

तापसी। एवम् भवतु।

कुमारः। आर्ये, सत्यम् एव निवर्तनम्? इतो माम् अपि नेतुम् अर्हसि?।

राजा। चरितं त्वया पूर्वस्मिन् आश्रमपदे; द्वितीयम् अप्य् अध्यासितुं समयः।

तापसी। जात, गुरोर् वचनम् अनुतिष्ठ।

कुमारः। तेन हि,

यः सुप्तवान् मदङ्के, शिखण्डकण्डूयनोपलब्धसुखः,।
तम् मे जातकलापम् प्रेषय शितिकण्ठकं शिखिनम्॥ 151॥

तापसी। एवं करोमि।

उर्वशी। भगवति, पादवन्दनं करोमि।

राजा। भवति, प्रणमामि।

तापसी। स्वस्ति सर्वेषाम्॥ इति निष्क्रान्ता॥

राजा। सुन्दरि,

अद्या 'हम् पुत्रिणाम् अग्र्यः सुपुत्रेण तवा 'नुना,।
पौलोमीसम्भवेनेव जयन्तेन पुरन्दरः॥ 152

विदूषकः । भवतु; किन्तु खलु साम्प्रतं तत्रभवत्या अनुमुखी संवृत्ता?।

राजा ।

किं, सुन्दरि, प्ररुदिता 'सि, ममो 'पनीते
वंशस्थितेर् अधिगमात् स्फुरति प्रमोदे, ।
पीनस्तनोपरिनिपातिभिर् अर्पयन्ती
मुक्तावलीविरचनापुनरुक्तम् अश्रैः?॥ 153 ॥

उर्वशी । शृणोतु महाराजः; प्रथमम् पुत्रदर्शनसमुत्थितेना "नन्देना "नन्दिता 'स्मि; इदानीम् महेन्द्रसङ्कीर्तनेन तदवधिर् मम हृदयेन स्मृतः ।

राजा । कथ्यताम् ।

उर्वशी । शृणोतु महाराजः; पुरा महाराजगृहीतहृदया गुरुशापसम्मूढा महेन्द्रेण 'वधिं कृत्वा 'भ्यनुज्ञाता ।

राजा । कथय किम् इति ।

उर्वशी । यदा स मम प्रियसखो राजर्षिस् त्वयि समुत्पन्नस्य पुत्रकस्य मुखम् प्रेक्षते, तदा मम समीपं त्वया "गन्तव्यम्" इति । ततो मया महाराजवियोगभीरुतया, चिरकालमङ्गमनिमित्तम् भगवतश् च्यवनस्या "श्रमदेशे पुत्रक आर्यायाः सत्यवत्या हस्त आत्मना निक्षिप्तः । अद्य पुनः पितुर् आराधनसमर्थः संवृत्त इति कृत्वा निष्पादित एष दीर्घायुर् इति को मे महाराजेन सह संवासः॥ राजा मोहम् उपगच्छति ॥

सर्वे । आः, समाश्वसितु समाश्वसितु महाराजः ।

कञ्चुकी । समाश्वसितु महाराजः ।

विदूषकः । अन्नह्माणम्, अन्नह्माणम् ।

Digitized by Google

राजा ॥ समाश्वस्य ॥

अहो, सुखप्रतिबन्धिता दैवस्य ।
आश्वासितस्य मम नाम सुतोपलब्ध्या
सद्यस् त्वया सह, शक्रोदरि, विप्रयोगः, ।
व्यावर्तितातपरुजः प्रथमाम्बुवृष्ट्या
वृक्षस्य वैद्युत इवा 'ग्निर् उपस्थितो ऽयम् ॥ 154 ॥

विदूषकः । अयं सो ऽर्थो ऽनर्थानुबन्धक इति तर्कयामि; अत्रभवान् देवराजः स्वयम् अनुग्राह्यितव्यः ।

उर्वशी । हा, हता 'स्मि, मन्दभागिनी; श्रुतविनयतनयस्य लब्धानन्तरं स्वर्गारोहणेना 'वसितकार्यां विप्रयोगमुखीम् मां महाराजः समर्थयिष्यति ।

राजा । सुन्दरि, मा मै 'वम् ।

न हि सुखभवियोगः कर्तुम्, आत्मप्रियाणि
प्रभवति परवत्ता, शासने तिष्ठ भर्तुः; ।
अहम् अपि तव सूनाव् अद्य विन्यस्य राज्यं,
विचरितमृगयूथान् आश्रयिष्ये वनानि ॥ 155 ॥

कुमारः । ना 'र्हति तातो महोच्चधारितायां धुरि तद्न्यं नियोजयितुम् ।

राजा । अपि, वत्स, मा मै 'वम् ।

भ्रमयति गजान् अन्यान् गन्धद्विपः कलभो ऽपि सन्,
प्रभवतितरां वेगोदग्रम् भुजङ्गशिशोर् विषम् ।
भुवम् अधिपतिर् बालावस्थो ऽप्य् अलम् परिरक्षितुं
न खलु वयसा जात्यै 'वा 'यं स्वकार्यसहो गुणः ॥ 156 ॥

आर्य तालव्य ।

कञ्चुकी । आज्ञापयतु देवः ।

Digitized by Google

राजा। मद्वचनाद् अमात्यपर्वतम् ब्रूहि, सम्भ्रियताम् आयुष्मतो राज्याभिषेकः ॥ कञ्चुकी दुष्खेण निष्क्रान्तः ॥

॥ सर्वे दृष्टिविघातं रूपयन्ति ॥

राजा ॥ आकाशम् अवलोक्य ॥ कुतो नु खलु भोः विद्युत्सम्पातः? ॥ निपुणम् अवलोक्य ॥ अये, भगवान् नारदः

गोरोचनानिकषपिङ्गजटाकलापः
संलक्ष्यते ग्रहगणैकलामलवीतसूत्रः, ।
मुक्ताफलातिशयसम्भृतयौवनश्रीर्
हेम्नः प्ररोह इव जङ्गमकल्पवृक्षः ॥ 157 ॥

अर्घो ऽर्घस् तावत् ।

उर्वशी। इदम् भगवतो ऽर्घम् ।

नारदः ॥ प्रविश्य ॥ विजयतां विजयतां मध्यमलोकपालः ।

राजा। भगवन्, अभिवादये।

उर्वशी। प्रणमामि।

नारदः। अविरहितौ दम्पती भूयास्ताम् ।

राजा ॥ जनान्तिकम् ॥ अपि नामै 'वं स्यात् ॥ प्रकाशम् ॥ और्वशेयः पुत्रो वः प्रणमति।

नारदः। आयुष्मान् आस्ताम् अयम् ।

राजा। अयं विष्टरो गृह्यताम् ॥ सर्व उपविशन्ति ॥

राजा। सविनयम् ॥ किम् आगमनप्रयोजनम्?।

नारदः। राजन्, श्रूयताम् महेन्द्रसन्देशः।

राजा। अवहितो ऽस्मि।

नारदः। प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिम् भवन्तम् अनुशास्ति,

राजा। किम् आज्ञापयति।

Digitized by Google

नारदः । चैलोक्यदर्शिभिर् आदिष्टः सुरासुरविमर्दो भावी, भवांश्च सांयुगीनः सहायस्, तेन न त्वया शस्त्रन्यासः कर्तव्यः; दयस्वो 'र्वशी यावदायुषस् ते सहधर्मचारिणी भवत् इति ।

उर्वशी । आश्चर्यम्; शस्त्रम् इव हृदयाद् अपनीतम् ।

राजा । परम् अनुगृहीतो ऽस्मि परमेश्वरेण ।

नारदः । युक्तम् ।

तव कार्यम् अयं कुर्यात्, त्वच्च तस्मे 'ष्टकार्यकृत्;।
सूर्यः संवर्धयत्य् अग्निम्, अग्निः सूर्यं स्वतेजसा ॥ ॥

॥ आकाशम् अवलोक्य ॥ रम्भे, उपनीयतां मत्सेन सम्भृतः कुमारस्या 'भिषेकः ।

रम्भा ॥ प्रविश्य ॥ अयं तस्या 'भिषेकसम्भारः ।

नारदः । उपवेश्यताम् अयम् आयुष्मान् भद्रपीठे ।

॥ रम्भा कुमारम् भद्रपीठ उपवेशयति ॥

नारदः । स्वस्ति भवते ।

राजा । वंशवर्धनो भव ।

उर्वशी । पितुस् ते वचनानि भवन्तु ।

॥ नेपथ्ये वैतालिकद्वयम् ॥

प्रथमः । अमरमुनिर् इवा 'त्रिः स्रष्टुर्, अचेर् इवे 'न्दुर्,
बुध इव शिशिरांशोर्, वैधवस्ये 'व देवः, ।
तव पितुर् अनुरूपस् त्वं गुणैर् लोककान्तैर्;
अतिशयिनि समाना वंश एवा ''शिषस् ते ॥ १७ ॥

द्वितीयः । तव पितरि पुरस्ताद् बन्धुभावास्थिते 'यं
स्थितिमति च विभक्ता त्वय्य् अनाकल्पधैर्ये ।
अधिकतरम् इदानीं राजते राजलक्ष्मीर्,
हिमवति जलधौ च प्राप्ततोये 'व गङ्गा ॥ १८ ॥

*Loc. masc. ** p. वंशे *** nom. pl. of स्वामिः

Digitized by Google

रम्भा । दिष्ट्या सखी पुत्रकस्य युवराजश्रियम् प्रेक्ष्य, भर्तुर् विरहे न वर्तते ।

उर्वशी । साधारण एव नो ऽभ्युदयः ॥ कुमारं हस्ते गृहीत्वा ॥ जात, ज्येष्ठमातरं वन्दस्व ।

राजा । तिष्ठ; समम् एव तत्रभवत्याः समीपं यास्यामस् तावत् ।

नारदः ।

आयुषो यौवराज्यश्रीः स्मारयत्य् आत्मजस्य ते ।
अभियुक्तम् महासेनं सैनापत्ये मरुत्वता ॥ १६१ ॥

राजा । अनुगृहीतो ऽस्मि मघवता ।

नारदः । भो राजन्, किं ते भूयः प्रियं करोतु पाकशासनः ?।

राजा । अतः परम् अपि प्रियम् अस्ति यदि भगवान् पाकशासनः प्रसादं करोतु ततः ।

परस्परविरोधिन्योर् एकसंश्रयदुर्लभम् ।
सङ्गतं श्रीसरस्वत्योर् भूयात् खलु तये सताम् ॥ १६२ ॥

अपिच

सर्वस् तरतु दुर्गाणि, सर्वो भद्राणि पश्यतु, ।
सर्वः कामान् अवाप्नोतु, सर्वः सर्वत्र नन्दतु ॥ १६३ ॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति श्रीकालिदासकृते विक्रमोर्वशीनामचोटके पञ्चमो ऽङ्कः ॥

॥ समाप्तो ऽयं ग्रन्थः ॥

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google



